CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२३५
५१

सं० २०५१

५१
आ९५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा· ~~४८८१~~ 2049

साहित्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा. २०५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा. २०५१

विज्ञापयति।

नं ५१५६

सुगृहीत-नामधेयेनार्य्यक्षेमीश्वरेण कविना प्रणीतम्, अभिनीतं क्षत्रिय-वंशावतंसस्य कार्त्तिकेयस्य पृथिवीपतेः परिषदि, अवलम्बित-चण्ड-कौशिक-चरितं चण्डकौशिकं नाम नाटकमपूर्व्वम् पीयूष-वर्षीवानन्द-सन्दोह-संवर्द्धनं सहृदय-हृदयानाम्। यच्च रचनानैपुण्योत्तम्भितासामान्य-कवित्व-शक्त्याकलितेन स्वभाव-वर्णनेन, यथास्थानमनुल्लङ्घित-निवेश-रीत्या पाञ्चालिकादि-रीत्या, यथासमयाङ्गीकृत-प्रसाद-प्रमुख-गुणगणेन अलोक-सामान्य-धीरोदात्त-नायक-चरितार्थ-सम्पदा श्रुतिदुष्टापुष्टार्थत्वादि-दोषाणामतिविरलतया नाट्य-शास्त्रोक्त-नाटक-लक्षणानुयायितया करुणादिभी-रसैरनुप्रासोपमादिभिरलङ्कारैश्च यथायथमलङ्कृततया चासंशयमर्हत्येवासनमध्यास्तुम् उपरि मुद्राराक्षसस्याधस्तादुत्तरचरितादेः सहैव वेणीसंहार-नागानन्दयोः।

मृच्छकटिक-मालतीमाधव-रत्नावलीप्रभृतयः प्रचलित-नाटक-नाटिकाः शृङ्गार-रस-बाहुल्येन बालानामुच्छिशृङ्खलमान-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौवन-कुसुमानामुपदेश-ग्रहण-व्यग्र-चेतसां विद्यालयस्थ-च्छात्राणां न सम्यक् पाठोपयोगिन्यः। चण्डकौशिक-नाटकन्तु करुणरस-प्रधानतया विरल-शृङ्गाररसतया च वेणीसंहारमिव सर्व्वदेशीयानां सर्व्वावस्थानां सर्व्वेषामेव पाठार्थिनां पाठोपयोगीति वयं मन्यामहे।

एतत् कविर्जन्मपरिग्रहेण कं देशं कञ्च कालमलञ्चकारेति न शक्यते निर्णेतुमस्माभिः। परन्तु एतावन्मात्रमेवानुमीयते, यदेतन्नाटकं नातिप्राचीनं न वा नितान्तमाधुनिकम्, यतो दशरूपक-काव्यप्रकाशप्रमुखेषु प्राचीनेषु निबन्धेषु एतद्ग्रन्थस्य नामापि नोल्लिखितम्। कविश्च यस्य नरपतेः कार्त्तिकेयस्य परिषदमुज्ज्वलयामास, तस्य नाम्नि च नानुभूयतेऽतिप्राचीनता। विक्रमादित्य-समयादनन्तरं पञ्चदशशत-मित-संवत्सरेष्वतीतेषु वङ्गदेशस्य पूर्व्वतमांशे ब्रह्मपुत्त्रनदस्य सन्निहित-प्रदेशे विश्वनाथकविराजः साहित्यदर्पणनामकमलङ्कार-ग्रन्थं प्रणिनाय। तेन च स्वरचित-ग्रन्थस्य षष्ठपरिच्छेदे नाटक-लक्षण-निरूपणावसरे चण्डकौशिकादप्युदाहरणं समुद्धृतम्। अत एतन्नाटकं चतुःशतमित-वत्सरेभ्यः पूर्व्वमितः सहस्रसंवत्सराभ्यन्तरे प्रणीतमित्यनुमीयतेऽस्माभिः।

मार्कण्डेय-पुराणान्तर्गत-हरिश्चन्द्रोपाख्यानमवलम्ब्य प्रणीतमेतन्मनोरमं नाटकम्। हरिश्चन्द्रो हि अतीव प्राचीनसमये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयोध्यायां साम्राज्यमकरोत्। स च दशरथतनय-रामात् पञ्चत्रिंशत्तम ऋतुपर्णपुत्त्र-नलादेकविंशो भगीरथाच्च चतुर्द्दश ऊर्द्ध्वतनः, ककुत्स्थात् सप्तविंशो मान्धातुर्द्वादशश्च अधस्तनः पुरुषः। स हि त्रिशङ्कुतनयः सार्द्ध-चतुःसहस्रमित-वत्सरेभ्योऽपि प्राचीनतरे कस्मिंश्चित् समये प्रादुरासीत्। स चैकदा वराहमन्विष्यन् तपोवनं प्रविवेश, ददर्श च तत्र तपस्यन्तं भगवन्तं कौशिकमार्त्तनादं कुर्व्वत् कामिनीत्रयञ्च। तदा च तं विश्वामित्रमजानन् नारीवधोद्यतं पापण्डं मत्वा तिरस्चकार, हन्तुं प्रववृते च। अथ कोपज्वलितो गाधिसुतः शापेन तं हरिश्चन्द्रं भस्मसात् कर्त्तुमुदयच्छत्, तदनुनयाच्च कौशलेन तं सत्यपाशेन सुदृढं बद्ध्वा राज्यं ससर्व्वस्वं प्रतिगृह्य निर्व्वासयामास, निचिक्षेप च अङ्गीकृत-दक्षिणा-प्रदानार्थमसीमे क्लेशसागरे। अथ सत्यव्रतो महात्मा हरिश्चन्द्रो वाराणसीं प्रविश्य पत्नीं तनयमात्मानञ्च विक्रीय दक्षिणामशेषतः प्रददौ, स्वयं च प्रतिपेदे नितान्तबीभत्सं चण्डालदासत्वम्। प्रभोर्नियोगाच्च महाश्मशाने मृतकम्बलहारी बभूव। अथ गच्छति काले हरिश्चन्द्रतनयो रोहिताश्वः कृष्णाहिना दष्टो जनन्या तदेव महाश्मशानमानिन्ये। तदा च मृतकम्बल-प्रदानसमये हरिश्चन्द्रपत्नी चीरचीवरधारिणं हरिश्चन्द्रं प्रत्यभिज्ञाय तस्य तादृशं दशाविपर्य्ययमवलोक्य च जीवन-परित्यागाय कृतनिश्चया बभूव। अथाविर्भूय भगवान् धर्म्मो रोहिताश्वं प्रत्युज्जीव्य साम्राज्यशासने विनि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युज्य च धर्म्मपत्नीसमेतं हरिश्चन्द्रं ब्रह्मलोकमनैषीदिति मार्कण्डेयपुराणोक्त-हरिश्चन्द्रोपाख्यानं चण्डकौशिक-नाटकस्य इतिवृत्ततया परिगृहीतम् ।

चतुःशत-परिमित-संवत्सरेभ्योऽपि प्राचीनतरे समये चण्ड-कौशिकमस्मद्देशे प्रचलितमासीत् । अथ इंलण्डीय-भूपतीनां भारतवर्षाधिकारात् पूर्वं प्ररूढ़े यवनाधिकारे वङ्गीयानां संस्कृत-भाषायां हृतादरतया मुद्रायन्त्रस्याभावेन च वहुभिरन्यैः परः-सहस्रैः संस्कृतग्रन्थैः सदृशम् एतदपि नाममात्रावशेषतामास-साद । इदानीं संस्कृतविद्यालयस्य पूर्व्वतनाध्यक्षेण संस्कृतभाषा-नुरागिणाध्यापकेन श्रीमता इ वि कावेल-महोदयेन भारतवर्षस्य दाक्षिणात्य-प्रदेशात् पुस्तकद्वयमाहृतम् । तयोरेकं पुस्तकं सप्त-षष्टि-संख्य-संवत्सरेभ्यः पूर्व्वं लिखितम्, अपरञ्च सप्तभ्यो वत्सरेभ्यः पूर्वं गुर्ज्जरप्रदेशे ग्रन्थप्रकाशकाभिधेन प्रस्तरयन्त्रेण मुद्रितम् । उभयमपि पुस्तकमतिदुर्व्वोधाक्षरं पदच्छेद-परिशून्यमशुद्धं लिपि-कर-प्रमाद-परिपूर्णञ्च । मुद्रितपुस्तकस्य च द्वित्राणि पत्राणि मया नैव आसादितानि । यदिचादर्शपुस्तके संस्कृतभाषया प्राकृत-प्रबन्धानां व्याख्या आसीत् तथापि तस्या मूलेन सह विसंवादितया अशुद्धतया च तामनादृत्यैवा स्माभिर्मूलानुयायिनीं प्राकृतव्याख्यां विधाय मुद्रिता चरमभागे विनिवेशिता च ।

संस्कृतविद्यालयस्य-च्छात्राणां काव्यशास्त्राध्यायिनां बोध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौकर्य्यार्थमस्माभिरेतन्नाटकस्य विषम-पद-व्याख्या च कृता, रामायण-महाभारत-स्कान्दपुराण-मार्कण्डेयपुराणादिभ्यः पौराणिकमितिवृत्तञ्च यथास्थानं समुद्धृतम्। अधुना प्रार्थये यदेतन्नाटकमस्मद्देशीये यूरोपीये च सुधीसमाजे प्रचरतु।

ज्यैष्ठस्य २०श दिनम्
शकाब्दाः १७८६
कलिकाता राजधानी

श्रीजगन्मोहन शर्म्मा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ चण्डकौशिकम् ॥

॥ प्रथमाङ्कः ॥

॥ नान्दी * ॥

देवस्त्रैगुण्यभेदात् सृजति वितनुते संहरत्येष लोकान्,
अस्यैव व्यापिनीभिस्तनुभिरपि जगद्व्याप्तमष्टाभिरेव ।
वन्द्यो नास्येति पश्यन्निव चरणगतः† पातु पुष्पाञ्जलिर्व्वः
शम्भोर्नृत्यावतारे वलय-फणि-फणा-फूत्कृतैर्व्विप्रकीर्णः ॥

---

* अत्र द्वादशपदा नान्दी । तल्लक्षणं यथा; आशीर्व्वचन-संयुक्ता नित्यं यस्मात् प्रयुज्यते । देव-द्विज-नृपादीनां तस्मान्नान्दीति संज्ञिता । माङ्गल्य-शङ्ख-चन्द्राब्ज-कोक-कैरव-शंसिनी । पदैर्युक्ता द्वादशभिरष्टभिर्व्वा पदैरुत इति ।

† नर्त्तकेन सपुष्पाञ्जलिना भाव्यमित्यनुसारेणेदम् । योहि गुणत्रयभेदात् सृष्टि-स्थिति-प्रलयान् करोति, यश्चाष्टाभिरेव मूर्त्तिभिर्निखिलं विश्वमण्डलं परिव्याप्य स्थितः ; जगति न कोऽपि तस्य वन्द्यो विद्यत इति विचारयन्निव महेश-हस्तस्खलितः कुसुमाञ्जलिस्तस्यैव चरणतले निपतित इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपिच

अरुणनयनं सभ्रूभङ्गं दरस्फुरिताधरं
सुतनु ! शशिनः क्लिष्टां कान्तिं करोतु तवाननम् ।
कृतमनुनयैः, कोपोऽयं ते मनस्विनि ! वर्द्धताम्,
इति गदितयाश्लिष्टो देव्या, शिवाय शिवोऽस्तु वः * ॥

अपिच

आनन्दश्लथिताः समाधिषु, मुखे गौर्य्या विलासोल्लसाः,
सम्भ्रान्ताः क्षणमुद्गताः, क्षणमथ स्मेरा निजे वैकृते ।
क्रूराः कृष्टशरासने मनसिजे, दग्धे घृणाकूणिता †-
स्तत्कान्तारुदितेऽश्रुपूरतरलाः, शम्भोर्दृशः पान्तु वः ॥

नान्द्यन्ते सूत्रधारः ॥ अलमतिविस्तरेण ; आदिष्टोऽस्मि दुष्टामात्य-बुद्धि-वागुरा ‡-ऽलङ्घ्य-सिंह-रंहसा भ्रूभङ्ग-लीला-समुद्धृताशेष-कण्टकेन समर-सागरान्तर्मज्जदण्ड-मन्दराकृष्ट-लक्ष्मी-स्वयंवर-प्रणयिना श्रीमहीपालदेवेन । यस्येमां पुराविदः प्रशस्ति-गाथामुदाहरन्ति ।

---

* प्रणयकुपिताया देव्या मानापनयमुपेक्ष्य मानोन्नतेः प्रार्थनया हास्यं, तन्मुखस्य चन्द्राधिकौत्कर्षाविष्कारेण हर्षञ्चोत्पादयता शिवेन रसान्तरोपायात् मानोऽपनीत इति भावः। रसान्तरलक्षणन्तु, रभस-त्रास-हर्षादेः कोपत्यागो रसान्तरमिति । यतो रभसादेः कोपत्यागस्तद्रसान्तरमित्यर्थः ।

† घृणया आत्मावमानेन सङ्कुचिताः ।

‡ वागुरा कूटयन्त्रम् । वागुरालङ्घ्य इत्यन्तं राज्ञो विशेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यः संश्रित्य प्रकृतिगहनामार्य्यचाणक्य-नीतिं,
जित्वा नन्दान्, कुसुमनगरं चन्द्रगुप्तो जिगाय ।
कर्णाटत्वं ध्रुवमुपगतानद्य तानेव हन्तुं,
दोर्द्दर्पाढ्यः स पुनरभवच्छ्रीमहीपालदेवः' ॥

प्रविश्य पारिपार्श्विकः ॥ अज्ज ! किं उण तेण राइणा समादिट्ठम् ? (१) ।

सूत्र० ॥ इदमादिष्टम्, यथा, किल विजयप्रकोष्ठ-प्रणष्टः कवेरार्य्य-क्षेमीश्वरस्य कृतिरभिनवं चण्डकौशिकं नाम नाटकं नाटयितव्यम् । स किल कविर्नाट्यवेद-विशारदान् विद्याकलाविदो लोकज्ञान् सभासदः प्रति एवमुक्तवान् ।

'दृष्टं किमपि लोकेऽस्मिन् न निर्द्दोषं न निर्गुणम् ।
आवृणुध्वमतो दोषान्, विवृणुध्वं गुणान् बुधाः !' ॥

तत् पारिपार्श्विक ! किमिति नारम्भयसि कुशीलवैः सह संगीतम् ?

पारि० ॥ सशङ्कमधोमुखं स्थित्वा ॥ सुणादु अज्जो, तदा गहोवराए जस्स दिअवरस्स अज्जेण दक्खिणा पड़िस्सुदा, सो दाणिं तस्सिमित्तं पड़िकुविदो त्ति, सअलोज्जेव कुशीलवजणो पज्जाउलो (२) ।

सूत्र० ॥ भयमभिनीय, चिन्तां नाटयित्वा, सहर्षम् ॥ मारिष ! अलमत्र पर्य्याकुलतया । अयमहमिदानीम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ददामि पालयन् सत्यं ब्राह्मणाय प्रतिश्रुतम् ।
हरिश्चन्द्र इवाद्यैव पुत्त्रदारात्म-विक्रयात् ।।

नेपथ्ये ॥ एदु एदु पिअवअस्सो (२) ।

सूत्र० ॥ नेपथ्याभिमुखमवलोक्य ॥ अये कथमसौ देवो हरिश्चन्द्रो महोत्पात-सूचितानां *-मापदां कुशल-परिणामाय प्रारब्ध-विविध-विधि-विस्तरेण पुरोधसा निभृतोपदिष्ट-नियमजागराव-सान-दुर्म्मनाः प्रियवयस्य-बौधायनोपदिश्यमान-वर्त्मा शुद्धान्त-मभिप्रस्थित एव । य एषः

निद्राविधेयारुण-मन्थराक्षः प्रजागर-क्षाम-मुखाम्बुजश्रीः ।
सद्योवियोग-व्यथितो दिनान्ते भ्रष्टः स्वयूथादुपसीव नागः ।।

तदेहि तत्रैव गच्छावः ।

।। इति निष्क्रान्तौ ॥

॥ प्रस्तावना † ॥

---

* उल्कापाताग्निवृष्टि-रक्तवृष्टि-धूमकेतूदयादिना सूचितानामनुमितानाम् ।

† "नटी विदूषको वापि, पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते । चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः । आमुखं तत्तु विज्ञेयं, नाम्ना प्रस्तावनापि सा" ।। अत्र अवलगिताख्या प्रस्तावना । तल्ल-क्षणन्तु, "यत्रैकत्र समावेशात् कार्य्यमन्यत् प्रसाध्यते । प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः" इति । समावेशात् सादृश्योद्भावनादित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ततः प्रविशति प्रजागर-खेदं नाटयन् राजा विदूषकश्च ॥

विदूषकः ॥ भो वअस्स ! पजागरमन्थरेहिं लोअणेहिं दरुग्गिरुमुहो विअ कुम्भो उम्मेसनिसेसाइं करेन्तोवि मग्गं अणवेक्खन्तो अन्धमूसओ विअ इदो तदो परिब्भमसि ? (४) ।

राजा ॥ वयस्य ! निद्रा हि नाम प्राणिनां प्रथममिदं शरीर-धारण-निमित्तं । कुतः,

चित्तं प्रसादयति, लाघवमादधाति *
प्रत्यङ्गमुज्ज्वलयति प्रतिभाविशेषम् ।
दोषानुदस्यति †, करोति च धातुसाम्यम्,
आनन्दमर्पयति योगविशेष-गम्यम् ॥

तन्ममापीदानीं पश्य,

निद्रालसं भङ्गमुपैति गात्रं, खेदातिभारालसितं मनश्च ।
मुहुर्मुहुर्व्वक्त्रमुपैति जृम्भा, बालातपालोकसहा न दृष्टिः ॥

विचिन्त्य सविस्मयम् ॥ कः पुनरद्य निशाप्रजागरम् । एतो भगवतः कुलपतेः‡-रभिप्रायः संवृत्तः ; अथवा न विचारमर्हन्ति गुरुशासनानि ।

---

* हस्तपदादि प्रत्येकमङ्गं लघु (कर्म्मदक्षं) करोतीति भावः ।

† शरीरगतान् मनोगतांश्च जाड्यादि-दोषान् निराकरोतीत्यर्थः ।

‡ मुनीनां दशसाहस्रं योऽन्न-दानादि-पोषणात् । अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृत इति कुलपतिलक्षणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदू० ॥ भो वअस्स ! अहं उण चिन्तअन्तो, वासकसज्जाए देवीए खण्डणाणत्थादो असं ण किम्पि पेक्खामि (५) ।

राजा ॥ वयस्य ! अलं परिहासेन ।

विदू० ॥ भो ! तव उण एसो परिहासो, मम उण अणाहवडुअस्स अणत्थोजेव्व (६) ।

राजा ॥ सोत्कण्ठं आशङ्कां नाटयित्वा ॥ वयस्य ! कथं पुनरवगच्छसि किं प्रतिपत्स्यते देवीति ?

विदू० ॥ परिकुविदेत्ति तक्केमि (७) ।

राजा ॥ एवमेतत् कः सन्देहः, नाल्पमिदं कोपकारणं देव्याः । तथाहि,

किं रुद्धः सचिवैरथ प्रणयिनां गोष्टीरसेनाहृतः * !
किं वा कामपि वल्लभामभिसृतो धूर्त्तोऽद्य नायात्यसौ ! ।
इत्थं कोप-कषाय-लोचन-गलद्-वाष्पाम्बु-धौताननं
निश्वस्य प्रियया शठे मयि तया किं किं न सम्भावितम् ॥

अपिच,

लीला-संभृत-मण्डनोत्सुकतया नीतः प्रदोषस्तया, †
मन्मार्गार्पित-नेत्रया च गमितो यामस्तथैवापरः ।

---

* प्रियवयस्य-समागमामोदेनाकृष्टहृदय इति भावः ।

† वल्लभेन सह विहारार्थमाहृत-भूषण-धारणौत्सुक्येन (विषयान्तर-व्यासक्त-चित्तया तया) कथमपि सायंकालोऽतिवाहित इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नायातः शठ इत्युदस्य विकलं व्याधूय भूषाविधिं,

शय्योपान्त-विवर्त्तनैरथ निशाशेषः कथं यापितः ॥

चिन्तां नाटयित्वा ॥ अहह ! नूनमसौ नतभ्रूः,

अभिपतति जने मदागमाशा-

विहित-हृथोद्गम-सम्भ्रमा तदानीम् ।

कृत-निभृत-परस्पर-स्मितासु स्थगित-

सुखीषु सखीषु नम्रमासीत् ॥

विदू० ॥ सहासम् ॥ भो वअस्स ! किं तुमं अदिक्कन्तमनुसोचअन्तो अत्ताणं आआसेसि, ता एहि, तहिं ज्जेव गदुअ देवीं पसादेह्म (८) ।

राजा ॥ सश्लाघम् ॥ सम्यगाह भवान्, तदेहि, तत्रैव गच्छावः ।

॥ इति परिक्रामतः ॥

राजा ॥ सखेदम् निःश्वस्य ॥ इदानीं भ्रष्टावसरस्य खेदकारणं गमनम् ।

तथाहि

विच्छिन्नामनुबध्नती * मम कथां, मन्मार्ग-दत्तेक्षणा,

मन्वाना सुमुखी चलत्यपि तृणे मामागतं सा मया ।

नाश्लिष्टा यदलक्षितेन निभृतं पश्चादुपेत्यादरात्,

यन्नास्या नव-नील-नीरज-निभे रुद्धे कराभ्यां दृशौ ॥

---

* योजयन्ती ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदू० ॥ परिक्रम्य नेपथ्याभिमुखमवलोक्य, सश्लाघम् ॥ भो वअस्स ! पेक्ख पेक्ख, एसा क्खु देवी उवणीद-पसाहणोवअरणाए चारुमदीए सह किम्पि मन्तअन्ती उवविट्ठा चिट्ठदि (९) ।

राजा ॥ दृष्ट्वा सहर्षम् ॥ अये ! कथम्

तन्वङ्ग्या शर-गौरयोः परिहृता पत्रावली गण्डयोः ?
कर्णान्तायतयोर्न वा मृगदृशा दत्तं दृशोरञ्जनम् ? ।
व्यालोला कवरी निसर्गकुटिला ? विम्बाधरो धूसर-
श्चित्रं ! सैव* तथापि कान्तिरनघा, द्वेष्टीव या मण्डनम् ॥

॥ ततः प्रविशति यथानिर्द्दिष्टा चिन्तां नाटयन्ती शैव्या चारुमती च ॥

चारुमती ॥ भट्टिणि ! एदं पसाहणोवअरणं (१०) ॥

शैव्या ॥ सखेदं ॥ हञ्जे चारुमदीए ! अवणेह एदं ; णिप्फल-पसाहणोवअरणासत्त-हिअआए कित्तिअं दाणिं अप्पा परि-भविदव्वो (११) ।

विदू० ॥ अहो से गरुओ अहिणिवेसो † (१२) ।

राजा ॥ साधु, देवि ! साधु ; परिभवस्थान एष ते प्रसाधनाभिनिवेशो निसर्ग-मधुराणामङ्गानाम् ‡ । तथाहि,

* चित्रं आश्चर्य्यं, तथापि भूषणापहरणेऽपि, सैव पूर्व्ववदेव, अनघा निर्म्मला, कान्तिः कमनीयता (रामनीयकं) लक्ष्यत इति शेषः ।

† एकाग्रता, तन्मनस्कता ।

‡ प्रसाधनाभिनिवेशो भूषणानुरागः (अलङ्करणासक्तिः) तव प्रकृत्या रमणीयानामङ्गानां परिभवस्थाने अवमानानापदे वर्त्तत इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नै ५१५८
मू० ११-

ताम्बूलरागोऽधरलोलुपो यद्,
यदञ्जनं लोचनचुम्बनोत्सुकम् ।
हारस्य कण्ठग्रहलालसो यत्,
स्वार्थः स तेषां*, नतु भूषणं ते ॥

विदू० ॥ भो वअस्स ! उवसप्पम्ह (१३) ।

राजा ॥ वयस्य ! इतोऽन्तर्हितौ शृणुवस्तावदस्या विस्रम्भजल्पितानि ॥ इति तथाऽवस्थितौ ॥

शैव्या ॥ निःश्वस्य सास्रम् ॥ हञ्जे चारुमदि ! तधा समासासिअ अज्जउत्तो मं विप्पलम्भगोअरं करेदि त्ति, सव्वधा णमो णमो अवीससणीआणं अत्तणो भाअधेआणं (१४) ।

राजा ॥ अयि मनस्विनि !

जलधरपटलान्तरिते यदि भानौ, खण्डनं गता नलिनी ।
तस्या न विप्रलम्भो, नोपालम्भोऽप्ययं भानोः ॥

चारु० ॥ भट्टिणि ! अलं सन्ताविदेण, वहुवल्लहा क्खु राआणो (१५) ।

विदू० ॥ सरोषं ॥ आः दासीए धीए ! एं वङ्कजम्पिणि भणेहि, किं अलिओवालम्भ-गोअरं पिअवअस्सं करेसि ? (१६) ।

राजा ॥ वयस्य ! अलमत्र क्रोधेन ।

---

* स अधरलोलुपत्वादिः । तेषां ताम्बूलरागादीनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानग्रन्थौ विधिज्ञाभिः सखीभिरुपदंहिते ।
धन्याः प्रयान्ति कान्तानां मिथ्योपालम्भपातताम् ॥

शैव्या ॥ रोदिति ॥

चारु० ॥ भट्टिणि ! समस्सस, समस्सस, णं अदिमेत्तमहाणुभावदाए तुए ज्जेव अदिभूमिं णीदो महाराओ ; ता जइ मं पुच्छसि, तदो, पलोअन्तोवि ण पलोइदव्वो, पिअं आलवन्तोवि चिरं उवालम्भेहिं खेदइदव्वो (१७) ।

शैव्या ॥ किंत्ति दे वअणं ण करिस्सं, जइ दिट्टे अज्जउत्ते एदस्स दुट्ट-हिअअस्स पहविस्सं (१८) ।

राजा ॥ सत्वरमुपसृत्य ॥ प्रिये !

मयि यस्याः प्रभावस्ते, हृदये मत्परायणे ।
त्वमात्मनो विशालाक्षि ! कथं न प्रभविष्यसि * ॥

विदू० ॥ सोत्थि भोदीए (१९) ॥

॥ उभे ससम्भ्रममुपतिष्ठतः ॥

शैव्या ॥ स्वगतम् ॥ कथं अज्जउत्तो ! भोदु एवं दाव ॥
प्रकाशम् ॥ जअदु जअदु अज्जउत्तो (२०) ।

---

* यस्यास्तव मयि प्रभुत्वमस्ति, सा त्वं मदधीने तवैव स्वकीयहृदये कथं न प्रभुत्वमाप्स्यसि । अनुगतभृत्याधीने स्वकीयेऽपि च वस्तुनि प्रभुता सर्वतो मुख्येवेति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चारु० ॥ साशङ्कमात्मगतम् ॥ कथं महाराओ ! हद्धी हद्धी, सुदं महाराएण जं मए मन्तिदं, भोदु एव्वं दाव ।। प्रकाशम् ॥ जअदु जअदु महाराओ ।। आसनमुपनीय ॥ एदं आसणं, एत्थ उवविसदु महाराओ (२१) ।।

॥ इति सर्वे उपविशन्ति ॥

राजा ॥ चिरं निर्वर्ण्य ॥ प्रिये ! नन्वियमिदानीन्ते,

किमपाङ्ग-वलित-तारा निवर्त्तते ? मयि वराङ्गि ! निपतन्ती ।
प्रातः सरोजगर्भे भ्रमरीव पिपासिता दृष्टिः ।।

अपिच तन्वङ्गि !

यद्यपि श्रियमाधत्ते भूषणानादरस्तव ।
तथाप्यन्तर्गतं मन्युमयं कथयतीव मे ।।

शैव्या ॥ सासूयमवलोक्य ॥ सुट्ठु सोहदि अज्जउत्तो इमेहिं निद्दालसेहिं अङ्गेहिं, उज्जाअर-मन्थरेहिं सोण-लोअणेहिं अ (२२) ।। इति कोपं नाटयति ॥

राजा ॥ चिरं निर्वर्ण्य सानुनयम् ॥ प्रिये ! प्रसीद, प्रसीद,

परिलुठति ललाटे भङ्गुरा भ्रूलता किम्,
मदन-जय-पताका-विभ्रमं विभ्रतीयम् ? ।
स्फुरति च किमकाण्डे चण्डि ! बिम्बाधरोऽयम्
मृदु-पवन-विधूतोन्निद्र-बन्धूक-बन्धुः ? ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अञ्जलिं बद्ध्वा ॥

चण्डि ! प्रसीद, परिकुप्यसि * किं मुधैव,
नाहं तथा, ननु यथा परिशङ्कसे माम् ।
दण्डं वराङ्गि ! मयि धारय, यत् क्षमं ते,
मन्निर्णये कुलपतिर्भगवान् प्रमाणम् † ॥

प्रविश्य प्रतीहारी ॥ जअदु जअदु महाराओ ; एसो कुलवदि-सआसादो तापसो पत्तो (२३) ॥

राजा ॥ हेमप्रभे ! सादरमविलम्बं प्रवेशय ।

प्रती० ॥ जं महाराओ आणवेदि (२४) ॥ इति निष्क्रान्ता ॥

॥ ततः प्रविशति शान्त्युदकहस्तस्तापसः ॥

तापसः ॥ सविस्मयम् ॥ अहो नु खलु भोः !

अपर्व्वण्येवेन्दोः किमयमुपरागः ! कथमयं
दिशां दाहो घोरः ! किमिति वसुधेयं प्रचलिता ! ।
छिनत्त्युल्कादण्डः ‡ किमिति सवितुर्मण्डलमहो !
महोत्पातोदर्कः कइव परिणामो हतविधेः ! ॥

---

* परिताम्यसि इति पाठान्तरम् ।

† मन्निर्णये मम दोषादोषनिरूपणविषये (मम परीक्षायां) भगवान् कुलपतिः पुरोधाः प्रमाणं साक्षीभूतः ।

‡ छिनत्त्युल्कादण्ड इति किमिति सवितुरित्यादि च पृथक् वाक्यम् । सवितु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा गुरुभिरनुचिन्त्यमानं सर्व्वमेवैतत् कुशलपरिणामम् ।

शान्तेः, स्वस्त्ययनात्, दानात्, विप्राणां स्वस्तिवाचनात् ।
दुःस्वप्नोत्पात-शमनं, सतां चैवानुकीर्त्तनात् ॥

अतएवाहं कुलपतिना भगवता प्रारब्धस्वस्त्ययनकर्म्मणः * शेषभूतं सर्व्वोत्पात-प्रशमनं शान्त्युदकं उपनेतुं राज्ञः शैव्यायाश्च सकाशं प्रहितः ।

प्रविश्य प्रतिहारी ॥ एदु एदु भवं (२५) ॥

॥ इत्युपसर्पतः ॥

तापसः ॥ उपसृत्य ॥ राजन्! स्वस्ति भवते ।

राजा ॥ ससम्भ्रममुत्थाय ॥ भगवन्! अभिवादये ।

शैव्या ॥ भअवं! पणमामि (२६) ॥

तापसः ॥ राजन्! विजयी भव; भवति! वीरप्रसूर्भूयाः ।

राजा ॥ ससम्भ्रमं ॥ आसनमासनम् ।

प्रती० ॥ आसनमुपनयति ॥

मण्डलं परिवेशः तस्यापि अशुभसूचकत्वात् । अथवा महीमण्डल-सूर्य्यमण्डलयोर्मध्यदेशेनोल्कापिण्ड-गमनात्तद्व्यवधानेन महीमण्डलवासिभिस्तड़िन्मालया मेघच्छेद इव सूर्य्यमण्डलच्छेदो लक्ष्यत इति तात्पर्य्यम् । शून्यमार्गे प्रधाविता उल्का द्रुततरवेगवशेन दण्डा इव लक्ष्यन्त इत्युल्कायां दण्डत्वमारोपितम् ।

* कर्म्मणा इत्यपि क्वचित् पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ इदमासनम्, अत्रोपविशतु भवान् ।

॥ इति सर्व्वे उपविशन्ति ॥

राजा ॥ हेमप्रभे ! द्वार्य्यवहिता भव ।

प्रती० ॥ जं भवं आणवेदि (२७) ॥ इति निष्क्रान्ता ॥

तापसः ॥ राजन् ! प्रतिगृह्यतामिदं भगवतः कुलपतेराशीर्भिरुपबृंहितप्रभावं निशाप्रजागरान्ते सकलत्रस्य भवतोऽभिषेचनाय स्वस्त्ययनशेषं भगवताऽनुप्रेषितं शान्त्युदकम् ।

राजा ॥ सहर्षं, अञ्जलिं बद्धा ॥ महान् प्रसादः ।

तापसः ॥

मन्त्रैः पूतं शमित-दुरितैः क्षततेजोऽभिदृष्टै
प्रारब्धस्य प्रशमनविधेरापदामुन्मुखीनाम् ।
एतत् पुण्यं किमपि परमं ते क्रियाशेषमम्भो-
भूयाद्भूत्यै, वितरतु मुदं, व्यापदो हन्तु सर्व्वाः ॥

इत्यभिषिञ्चति ॥

राजा ॥ सहर्षमभिनीय ॥ अये !

इदं तत् क्षत्रबीजस्य प्रसवाङ्कुरकारणम् ।
यस्य प्रसादादादित्यैः *-र्नृपैरुच्चैर्धृतं शिरः ॥

---

* आदित्यैः सूर्य्यवंशीयैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तापसः ॥ भवति शैब्ये ! त्वयापि भगवतः कुलपतेरादेशात् सविशेषमद्य प्रवर्त्तयितव्यो गृहदेवतानां ब्राह्मणानाञ्च पूजा-सम्भारः ।

शैब्या ॥ अञ्जलिं बद्धा ॥ जं भवं आणवेदि (२८) ।

तापसः ॥ राजन् ! स्वस्ति भवते, अहमपि प्रारब्ध-विविध-विधिविस्तरं भगवन्तं कुलपतिमेव सम्भावयामि ।। इति निष्क्रान्तः ॥

शैब्या ॥ सवैलक्ष्यं अपवार्य्य ॥ हञ्जे चारुमदीए ! भअवदा कुलवदिणा समादिट्ठो अज्जउत्तस्स निसापजाअरो, ता, दुज्जनीकिदह्मि इमिणा दुप्पञ्चएण दुट्ठहिअएण । भोदु, एव्वं दाव ।। अञ्जलिं बद्धा, प्रकाशम् ॥ पसीददु अज्जउत्तो (२९) ।।

राजा ॥ सानुरागम् ॥

ग्राह्यः प्रिये ! यदि मयाऽनुनयस्तवायं
मिथ्यापराध-कलुषीकृत-चेतसापि ।
आरोपयामि तव हारलतां सुकण्ठे *
पत्रावलिं विरचयामि कपोलदेशे ।।

शैब्या ॥ लज्जां नाटयति ॥

राजा ॥ नाट्येन तथा कुर्व्वन् ॥ प्रिये !

---

* स्वकण्ठे इति पाठान्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तव सपुलकस्वेदो गण्डः, करे मम वेपथु-

स्तदुभयविधिर्व्यर्थारम्भो, वृथैव मम श्रमः ।

अपि विनिहितः कण्ठे हारः स्तनाग्र-तरङ्गितो

मम करपरिष्वङ्ग*-प्राप्तं न मुञ्चति वेपथुम् ।।

शैव्या ॥ अज्जउत्त ! भअवदा कुलवदिणा जधा आणत्तं, तधा अणुचिट्ठिदुं गमिस्सं (३०) ।

राजा ॥ देवि ! एवं क्रियताम् ।

इत्युभे निष्क्रान्ते ॥

राजा ॥ वयस्य ! कथं पुनरिदानीं सोत्कण्ठमात्मानं विनोदयामि ?

विदू० ॥ भो वअस्स ! तुमं देवी-सम्बन्धाए कधाए कीस ण अत्ताणअं विणोदेसि, अहं पि भोअण-कधाए अत्ताणअं विणोदइस्सं (३१) ।।

प्रविश्य वनेचरः ॥ जअदु जअदु भट्टा; एसो क्खु, विअड़-घोणग्ग-णिद्दलिद-मुत्थत्थली-लग्ग-परिमलुग्गार-सुरहि-णीसास-मारुद-परिक्खित्त-तन्त-जन्तन्तर-दर-चक्खिज्जंत-पण्डर-कसेरु-कक्करच्छल-पइस्स-पड़िवक्ख-जअ-विटत्त-णिअ-जसुक्कर-पूरिद-दस-दिसाविभाओ वरिसन्त-सिलासारो विअ णव-जलहरो गरुअ-गव्व-

* परिरम्भः परिष्वङ्गः संश्लेष इत्यमरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गम्भीर-घुरुघुरासद्द-विद्दाविद-वण-सिंह-णिअर-रवा-असणा-मरिस-उसमिद-कण्ण-सुत्तिपुड़मुव्वहन्तो विप्फुरन्त-गरुअ-रोसा-णल-सिहा--सन्देहिज्जन्त-तरलतर-जीहा-लदा-वित्थारो निर-न्तर-परिप्फुरन्त--वण-लग्ग-दावानलु-ग्गार-भासुरो विअड़-तड़ि-च्छड़ा-कड़ार-केसर-सड़ा-कडप्पो णिसिद-करवाल-विमलेन्द-णील-कज्जल-तमाल-सामलो परिप्फुरन्त-पिङ्गच्छि-विच्छोहो बहल-मसी-मंसलो फुलिङ्गसेसो विअ दावाणलो दन्तन्तर-खण्डण-भग्ग-कुण्डलिज्जन्त-विसदण्ड-भासुर-विअड़-दाढ़ा-कराल-मुह-मण्ड-लो चिरआल-सङ्कड़िद-वेराणुबन्ध-गरुअ-रोसु-ब्भड़-कवलग्गह-विखण्डिद-चन्द-मण्डलुव्वरन्त-कला-जुअल-सोहा-सणाहो विअ पलअ-णिसा-तिमिर-सङ्घाओ ओदालिद-धरावलअ-लीला-समु-त्थिदो विअ महावराहो उत्थिदो वराहजूधाधिवई मअव्व-भूमिं ता एदं सुणिअ भट्टा पमाणं। अहं पि तहिं जेव्व गच्छामि (३२)।

राजा ॥ सहर्षम् ॥ हन्त ! लब्धमिदानीं विनोदस्थानम् ।

विदू० ॥ सरोषम् ॥ भो वअस्स ! अरण्ण-चङ्कमण-कण्टअ-सअ-विमद्दण-समविसम-लङ्घण-बुभुक्खा-पिपासा-दोस-संकुलं बङ्ग-पञ्चवाअं जइ मअव्वं विणोअणोवाअं, ता किं उण दे आआस-ट्ठाणं भविस्सदि (३३)।

राजा॥ वयस्य ! मृगया हि नाम भृशमुपकारिणी राज्ञाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाहि,

खिन्नं विनोदयति मानसमातनोति
स्थैर्य्यं चले, * वपुषि लाघवमादधाति † ।
उत्साहवृद्धि-जननीं रणकर्म्म-योग्यां
राज्ञां मुधैव मृगयां व्यसनं वदन्ति ॥

तदेहि, तत्रैव गच्छावः ।

॥ इति निष्क्रान्ताः सर्व्वे ॥

॥ इति आर्य्य-क्षेमीश्वर-कृते चण्डकौशिक-नाटके प्रथमोऽङ्कः ॥

---

* चले अर्थादितस्ततः प्रधाविते लक्ष्ये, स्थैर्य्यं स्थिरसन्धानं आतनोति संसाधयति ।

† पाटवं अर्पयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ चण्डकौशिकम् ॥

॥ द्वितीयाङ्कः ॥

नेपथ्ये ॥ भो वराहान्वेषिणः !

एष चुम्बाति* पङ्कं, दलति† कमलिनीमत्ति गुन्द्रा‡-प्ररोहान्,
आरान् मुस्तास्थलानि स्थपुटयति§, जलान्युत्कसेतूनि¶ याति ।

---

* विलोड़यति ।

† विमर्द्दयति ।

‡ "मुस्तकः कुरुविन्दः स्याद्गुन्द्रा च जलदाह्वयः" इत्यभिधानरत्नमाला । "लतागोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली" इति, "मुस्ता मुस्तकमस्त्रियां स्याद् भद्रमुस्तको गुन्द्रा" इति चामरः ।

§ स्थपुटानि विषमोन्नतानि करोतीति स्थपुटयति । "स्थपुटं विषमोन्नतम्" इति हेमचन्द्रहलायुधौ । मालतीमाधवे, "स्थपुटगतमपि क्रव्यम्" इत्यत्र, स्थपुटगतं निम्नोन्नत-विषम-स्थान-गतमिति जगद्धरेण, सङ्कुचित-भाग-प्रविष्टम्, मस्तकादि-निम्नोन्नत-गतमिति च मालाङ्केन व्याख्यातम् । अथवा स्थपुटयति तृणादिनाच्छादयति । तथाच "महाझञ्झानिलः प्राप्तः पर्व्वतान्दोलन-क्षमः । मख-मण्डप-भूस्तेन क्षणात: स्थपुटीकृता" इत्यत्र स्थपुटीकृता तृणादिनाच्छादितेति पूर्व्वसूरिभिर्व्याख्यातम् ।

¶ उत्काः संशयमारूढ़ाः सेतवो येषां तानि । उत्कसेरूणीति पाठे, उत्क्षिप्ताः कसेरवः (केशुर) तन्नामप्रसिद्ध-मूलविशेषा येभ्यस्तानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्तः प्राप्तः प्रविष्टो वनगहनमयं याति यातीति सैन्यैः
पश्चादन्विष्यमाणः प्रविशति विषमान् काननान्तान् वराहः ।।
तदवष्टभ्यतां समन्ताद्वनानि ।
आस्तीर्य्यन्तामुपान्ते * वनहति-निपुणै † र्जालिकैर्जालबन्धाः,
मुच्यन्तां शृङ्खलाभ्यः श्वगणिभिरटवीगह्वरे सारमेयाः ।
आकीर्य्यन्तां स्थलानि श्रमशिथिलहयैः सादिभिः पाश-हस्तै-,
र्व्याधूयन्तां कृतान्तैरिव महिषचरैर्दण्डिभिः काननानि ।।

॥ ततः प्रविशति रौद्रोज्ज्वल-वेशः सम्भ्रान्तो विघ्नराट् ॥

विघ्नराट् ॥ साशङ्कम् ॥

शम्भोः समाधिरपि येन कृतान्तरायो,
दक्षस्य चाध्वरविधिः, शिवयोश्च ‡ केलिः ।
सोऽहं जगत्त्रय-हित-व्यवसाय-सिद्धि-
विध्वंस-विभ्रम-परः § परमोऽस्मि विघ्नः ।।

तदहमिदानीम्,

---

* उपान्ते सविधे । "आसन्नं सविधं पार्श्वमुपान्तम्" इति हलायुधः ।

† अरण्य-वेष्टनपटुभिः ।

‡ शिवा च शिवश्च, तयोः ।

§ जगत्त्रयस्य त्रिलोकस्य हितः श्रेयस्करः यो व्यवसायो यत्नः चेष्टा वा तस्य या सिद्धिः सफलता तस्या विध्वंसे समुच्छेदे यो विभ्रमो विलासस्तस्मिन् परः निरतस्तत्परः । विस्मयपर इत्यपि क्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिद्यात्रयं हरिहरात्मभुवामसाध्यम्
उग्रैस्तपोभिरिह साधयतो महर्षेः ।
क्रीड़ा-वराह-वपुरद्य समुद्धरामि,
लोकत्रयं हरिरिवादिवराहरूपः * ।।

पश्चादवलोक्य, सभयम् ॥ अहो ! से जगत्कल्याण-परिपन्थिनः पर-पौरुषान्तराय-रसिकस्य अनपेक्षित-शरीराणि साहसानि । यतः, कृतान्त-दन्तान्तर-वर्त्तिनमात्मानं मन्यमानेन कथंकथमपि शर-गोचरं परिहृत्य नीतस्तावदयं मया महाराज-हरिश्चन्द्र दूममर-ण्योद्देशम् । तद्यावत्, विश्वामित्रस्याश्रममसुं प्रापयामि । यतः, तेन किल तीव्र-तपसा क्षत्रिय-ब्राह्मणेन सर्गान्तर-प्रथम-प्रजा-पतिना त्रिशङ्कु-याजकेनोत्पत्ति-स्थिति-प्रलय-विधायिनीनां गुण-त्रयमयीनां विद्यानां सिद्धये, किमपि दुष्करमारब्धं वर्त्तते ।

तथाहि,

यतो धाता विश्वं सृजति, न हरिर्नापि च हरो,
हरिर्गोप्ता लोकानवति, न विरिञ्चिर्न च हरः ।
यतः संहर्त्तासौ हरति हर एकस्त्रिभुवनं,
तदेकस्मिन् सिद्धिं व्रजति कथमन्यत्र निखिलम् ? ।।

---

* आदिवराहरूपधृक् हरिर्यथा महाजलधिमग्नं लोकत्रयं समुद्धृतवान्, तथैवाहं क्रीड़ानिमित्तं वराहरूपी सन् महर्षि-विश्वामित्र-हस्तगतं सृष्टि-स्थितिप्रलयानुगुण-विद्यात्रयं समुत्तारयामीति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विचिन्त्य ॥ अथवा परमनैष्ठिकेऽस्मिन् किं न सम्भाव्यते, किन्तु सुलभ-कोपतया मुनिस्वभावानां कामक्रोधयोश्च श्रेयःपरिपन्थिनीं वृत्तिमाश्रित्येदमुपक्रान्तम्*; तन्न जाने, किमत्र फलिष्यतीति ।

नेपथ्ये ॥ गहनतर-वनान्तर्धान-गर्व्वित ! तिष्ठ रे क्रोड़ाधम † ! तिष्ठ ।

दूरं कुतूहलवशात् क्षण-दृष्ट-नष्ट !
मायामिवाश्रितवतापहृतस्त्वयाहम् ।
पन्थानमेषि यदि मेऽद्य दृशोस्तदानीम्,
मद्रासि दुष्ट ! न पुनर्नलिनीवनानि ॥

विश्व० ॥ श्रुत्वा सहर्षम् ॥ अये ! कथमासन्न एवायं, तद्यावदितो निर्गत्य तामेव मायामास्थाय दर्शयाम्यात्मानम् ॥ इति सत्वरं परिक्रम्य निष्क्रान्तः ॥

---

* मुनयः स्वभावतः सुलभ-कोपा भवन्ति, विशेषतः विश्वामित्रेण सृष्टिस्थिति-प्रलय-कर्त्तृत्वरूप-कामस्य वशिष्ठादि-ब्राह्मणान् प्रत्यसूया-जनित-क्रोधस्य च वृत्तिमाश्रित्य इदं तपः समारब्धम्, कामक्रोधानुसारिणी हि वृत्तिः श्रेयःप्रतिबन्धिकेति अस्य विद्यात्रय-सिद्धि-व्याघातस्य सम्भावनास्त्येवेति भावः ।

† क्रोड़ेषु वराहेषु अधमो निकृष्टः । तथाच रत्नमालायां, "कोलः क्रोड़ः शूकर स्तादराह" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ ततः प्रविशति गृहीत-शरासनोऽनुसरणं नाटयन्

रथस्थो राजा, सारथिश्च ॥

राजा ॥ पूर्व्वोक्तं पठित्वा, अग्रतोऽवलोक्य, सहर्षम् ॥ आर्य्य ! आर्य्य ! नातिदूरवर्त्तिना तेन भवितव्यम् । तथाहि, पश्य,

मृणालीभिः कीर्णा कवल-गलिताभिर्व्वनभुवः,
सरस्तीरे धाराः क्षुभित-जल-निस्यन्दि-पयसाम् * ।
श्रमोद्गीर्णैः फेनैः शवल-नव-शष्पा स्थलभुवो,
घनास्तन्निश्वासैर्म्मरुत इह मुस्तासुरभयः ॥

निपुणमवलोक्य, सहर्षम् ॥ आर्य्य ! आर्य्य ! अयमसौ, पश्य पश्य,

हेलावल्गित †-कन्धरः सरभस-प्रोत्खात-कन्दाङ्कुर-
व्यासक्ताकुल-लोल-नाल-नलिनं वक्त्रान्तराले वहन् ।
अन्तर्गूढ़-विरूढ़-नाभिनलिन-प्राप्तासनाम्भोरुहः ‡
क्रीड़ाक्रोड़ इवोद्दिधीर्षति पुनर्दंष्ट्राग्रलग्नां भुवम् ॥

---

* क्षुभितेभ्य आलोड़ितेभ्यो जलेभ्यः सरसीस्थितसलिलेभ्यः निस्यन्दिनां वेलामतिक्रम्य चरितानां पयसां जलानाम् । अथवा क्षुभितानि आलोड़ितानि जलानि यैः अर्थात् अङ्गैः, तेभ्यः निस्यन्दिनां चरतां पयसामित्यर्थः । अवगाह्य गच्छतः शरीरात् जलधाराः पतन्तीति प्रसिद्धमेव ।

† हेलावक्रितकन्धर इति पाठान्तरम् ।

‡ अन्तर्गूढ़-विरूढ़-नाल-नलिन-क्षिप्तासनाम्भोरुहामिति पाठान्तरम् । अन्तर्गूढ़-विरूढ़ं, (जलमध्ये गूढ़रूपेण जातं) नाभिनलिन-प्राप्तासनं (नाभिकमलेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सानन्दं ॥ कथमवलोक्य मामभिमुखमापतितः ॥

॥ इति शरसन्धानं नाटयति ॥

सूतः ॥ सकौतुकमवलोक्य ॥ आयुष्मन् ! पश्य पश्य,

गर्वादेत्य पुनर्निवृत्य तरसा लक्षीकृतस्तत्क्षणं,

त्रासाकुञ्चित*-मायताग्रचरणः पश्चार्ध†-माकर्षयन् ।

प्राप्तं आसनं यस्मिन् तत्) नाभिनलिन-प्राप्तासनं । अन्तर्गूढ़-विरूढ़ं नाभिनलिन-प्राप्तासनं अम्भोरुहं यस्य । अथवा अन्तर्गूढ़विरूढ़ं अथच नाभिनलिन-प्राप्तासनं (नाभिनलिने प्राप्तं आसनं स्थानं येन तथाभूतं) अम्भोरुहं यस्य । जलमध्य-सम्भूत-कमलेन मायावराहस्य नाभिकमलं सृष्टमिति भावः । वराहावतारपक्षे, आसनमेव अम्भोरुहं आसनाम्भोरुहं, पद्मासनं । प्राप्तं अर्थात् लब्धं आसनाम्भोरुहं प्राप्तासनाम्भोरुहं । अन्तर्गूढ़-विरूढ़-नाभिनलिनमेव प्राप्तासनाम्भोरुहं यस्य । वराहावतारस्य नाभिकमलं तस्यैव पद्मासनत्वं प्राप्तमिति भावः । अन्तर्गूढ़-विरूढ़-नाभि-नलिन-क्षिप्तासनाम्भोरुहामिति पाठे, आस्यते अस्मिन्निति आसनं, उपवेश्यं अम्भोरुहं यस्य स, आसनाम्भोरुहो ब्रह्मा । अन्तर्गूढ़-विरूढ़ं यत् नाभिनलिनं, अर्थात् स्वस्य, तस्मात् क्षिप्तः परित्यक्तः आसनाम्भोरुहो यस्यां । नारायणो हि नाभिकमलात् कमलासनं भूमौ परित्यज्य महावराहरूपमास्थाय धरामण्डलमुद्धृतवानिति भावः । एतच्चरणमतिदुर्व्विगाहमिति यथाकथञ्चित् व्याख्यानं कृतं, किन्तु एतत् व्याख्यानं अस्मभ्यमेव न रोचते, दूरेचास्तां सहृदय-सन्तोष-प्रत्याशा । वस्तुत एतच्चरणं कालवशेन लेखकप्रमादात् कारणान्तराद्वा रूपान्तरितमिति वयं मन्यामहे ।

* त्रासात् कुञ्चितमिति पाठान्तरम् ।

† अपरस्यासौ अर्द्धश्चेति पश्चार्द्धः । "अपरस्यार्द्धे पश्चभावो वक्तव्यः" इति कात्यायन-वार्त्तिकेन अपर-शब्द-स्थाने पश्च आदेशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वासोद्रेक-विदीर्ण-सृक्क-विवर-भ्रश्यन्मृणालाङ्कुरो
दंष्ट्रामर्पयतीव ते व्यपगत-व्रीड़ा-विलक्षाननः * ॥

राजा ॥ बाणमोक्षणं नाटयन्, उपसृत्य, समन्तादवलोक्य, साश्चर्य्यम् ॥ अये ! कथमनवसरएवैतत्क्षणतिरोहितेऽस्मिन् बाणमोक्षः कृतः ! तथाहि

क्षणादन्तर्धत्ते, क्षणमथ दृशोरेति विषयं,
मुहुर्दूरं यातो, भवति पुनरप्यन्तिकचरः ।
पुरः पार्श्वे पश्चाद्भ्रमति परितस्तत्कथममुं
स्फुरद्विद्युल्लोलं कलयति नु लक्ष्यं मम मनः ॥

निपुणमवलोक्य, दूरतो दृष्ट्वा, सानन्दम् ॥ कथमिमामरण्यानीमतिक्रम्य प्रसन्नां भुवम् † अधिरूढ़ः ! । सूत सूत ! सत्वरं प्रेरयाश्वान् क्व पुनरिदानीं यास्यति ।

---

* व्यपगतेन व्यपगमनेन पलायनेन या व्रीड़ा, तया विलक्षं वैलक्ष्ययुक्तं आननं यस्य तादृशः । समरे पराजिता राजानो यथा पराभवाङ्गीकार-सूचनाय शिरोभूषणमुकुटादिकमर्पयन्तो आत्मरक्षां प्रार्थयन्ते । तथायं वराहोऽपि त्वत्तो भयात् पलायनेन जनितलज्जः स्वीयशरणागतत्व-सूचनार्थम् आत्मापकर्षद्योतनार्थञ्च तव समीपे श्वासोद्रेक-विदीर्ण-सृक्क-विवर-भ्रश्यन्मृणालाङ्कुरच्छलेन स्वीयदंष्ट्रामर्पयतीवेति भावः । अथवा व्यपगतः पलायितः अतएव व्रीड़ाविलक्षाननः । केचित्तु व्यपगतया व्रीड़या अविलक्षं आननं यस्येत्येवंविधं समासं कुर्व्वन्ति । तदस्माभ्यं न रोचते ।

† समभुवमिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूतः ॥ तथा कृत्वा रथवेगमभिनीय ॥ आयुष्मन् ! पश्य पश्य,

जवाज्जित्वा पश्चात्सततरजसः * पृष्ठमरुतः
पुरो लब्ध्यासत्ति-त्वरितमनुधावन्मम मनः ।
अयं ते निष्कम्प-ध्वज-पट-परामृष्ट-जलदो
रथस्तांस्तान् देशानभिपतति तुल्यं त्वदिषुभिः ॥

राजा ॥ सविस्मयम् ॥ तथाहि,

दिवि व्यावल्गद्भि-†-र्विजितपवनैः स्यन्दनहयै-
र्जवादुत्क्रामद्भिर्जलनिधिमिवाम्नाय पततः ।
अहो दूराद्दूरं व्रजति मम भिन्नाञ्जनचय-
च्छवि-श्यामः ‡ क्रोड़ो दिनकृत इव ध्वान्तनिचयः ॥

अग्रतोऽवलोक्य, सखेदम् ॥ कथमिमामरण्यानीमतिक्रम्य सम्प्रत्य-स्तमित-दर्शनस्य पदपङ्क्तिरप्यन्तर्हिता ! भवतु, अग्रतस्तावदिमां सुस्निग्धामरण्यलेखां विचिनोमि ॥ इति तथा कुर्व्वन्, सानन्दम् ॥ हन्त ! तपोवनोपकण्ठेनानेन भवितव्यम् । तथाहि,

---

* सततानि सन्ततानि विकीर्णानि रजांसि यैस्ते ।

† विशेषेण सम्यक् वल्गद्भिः । वल्गितञ्च अश्वानां गतिविशेषः । तथाचामर-सिंहः ; "आस्कन्दितं, धौरितकं, रेचितं, वल्गितं, प्लुतम्" इति । वल्गितं वेगेन विक्षिप्तोपरिचरणमिति रायमुकुट-भरतमल्लिक-नीलकण्ठ-प्रभृतयोऽमरटीकाकृतः तथाच वेगेनाग्रचरणौ ऊर्द्ध्वं विक्षिप्य धावद्भिरिति फलितार्थः ।

‡ छविच्छाय इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आमूलं क्वचिदुद्धृता, क्वचिदपि छिन्ना, स्थली वर्हिणाम्,
आनम्रा कुसुमोच्चयाच्च, सदयाकृष्टाग्रशाखा, लता ।
एते पूर्व्व-विलून-वल्कलतया रूढ़-व्रणाः शाखिनः,
सद्यश्छेदममी वदन्ति समिधां प्रस्यन्दिनः पादपाः ॥

समन्तादवलोक्य, स्मृतिमभिनीय, सकौतुकम् ॥ आर्य्य ! पश्य पश्य,

नीपस्कन्धे कुहरिणि शुकाः स्वागतं व्याहरन्ति,
घ्राणग्राही हरति हृदयं हव्यगन्धः समीरः ।
एता मृग्यः सलिल-पुलिनोपान्त-संसक्त-दर्भं
पश्यन्त्योऽस्मान् सचकितदृशो निर्झराम्बः पिबन्ति ॥

तदलमिदानीमाश्रमोपशल्य-चारिणानेनाविष्टेन । सूत ! सम्प्रति गृहीतोदकान् विश्रामयाश्वान् । यावदहमपि धनुर्मात्रसहाय एवाश्रमपदं प्रविश्य मुनीनभिवादये । अतिक्रान्तान्यर्हणीय-सभाजनानि किल श्रेयसां परिपन्थीनि भवन्ति ॥ इति रथावतरणं नाटयति ॥

सूतः ॥ यथादिशति स्वामी ॥ इति निष्क्रान्तः ॥

राजा ॥ चिन्तां नाटयित्वा, सश्लाघम् ॥ अहो निर्ग्रन्थिरमणीयतया निरतिशयानि तपोवनवासिनां सुखानि । कुतः,

मनः सम्भोगेभ्यः स्पृहयति न सङ्कल्प-विरतं,
वियोगेषु स्नेहान विदधति न वा निर्म्ममतया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहङ्कार-त्यागान्निज-पर-विभाग-व्युपरमे
परां शान्तिं प्राप्ताः किमपि सुखिनः * संयम-धनाः ॥

सविनयं परिक्रम्य, साध्वसमभिनीय, साशङ्कम् ॥ अये! कथं सापराधस्येव साध्वसमुपजनयन्त्यप्रश्रयदुरालोकान्यदृष्टपूर्व्वतया तपोवनानि †; अथवा सर्व्वाभिभावि किमप्यनभिभवनीयं तेजसामुपरि तपोमयं ब्राह्मतेजः । कुतः,

पदे पदे साध्वसमावहन्ति प्रशान्त-रम्याण्यपि मे ‡ वनानि ।
सर्व्वाणि तेजांसि मृदूभवन्ति स्वयोनिमासाद्य यथाग्निरम्भः ॥

॥ इति ससाध्वसं परिक्रामति ॥

नेपथ्ये ॥ परित्ताअध अज्जा! परित्ताअध, एदाओ अणबराधमाणाओ अणाधाओ असरणाओ ऊदवहे परिक्खिविआमो मन्दभाइणीओ ता परित्ताअध अज्जा! परित्ताअध ।

राजा ॥ श्रुतिमभिनीय ससंभ्रमम् ॥ अहह! इतो नातिदूरे भयार्त्तानां योषितामिवार्त्तः प्रलापः श्रूयते ॥ साश्चर्य्यम् ॥ अये! तपोवनमिदम्, क्क पुनरत्तेदृशानामविनीतानां सम्भवः! भवतु, उपसर्पामि ॥ तथा करोति ॥

नेपथ्ये ॥ तथैव पठ्यते ॥

---

* सुधिय इति पाठान्तरम् ।

† अप्रश्रयाणाम् अविनीतानाम् दुरालोकानि दुर्द्दर्शानि तपोवनानि कथमदृष्टपूर्व्वतया सापराधस्येव मम साध्वसं भयमुपजनयन्ति उत्पादयन्ति ।

‡ रम्याण्यपि वेति क्वचित् पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ श्रुत्वा सावष्टम्भम् ॥ अभयमभयम् भयार्त्तानाम् ॥

सक्रोधम् ॥ आः !

कोऽयं तपोवन-विरुद्धमनात्मनीनं,
क्रूरो नृशंसमनुतिष्ठति कर्म्म घोरम् ।
तस्यैष बाण-*-परिलून-शिरोधरस्य
प्रत्यङ्गमुज्ज्वलशिखे ज्वलने जुहोमि ॥

इति परिक्रम्य, नेपथ्याभिमुखमवलोक्य, सविस्मयम् ॥ अये ! कोऽयं मध्येऽग्न्युपासीनेन विलपता भयार्त्तेन दिव्यरूपिणा नारीत्रयेण सह सन्निहित-होमसाधनोऽग्निशालामध्यास्ते ! नूनं तापसाकल्पधारिणा पाखण्डेनानेन † भवितव्यम् ।

॥ ततः प्रविशति होमं नाटयन् विश्वामित्रो, यथानिर्दिष्टाश्च विद्याः ॥

विद्याः ॥ संभ्रमं नाटयन्त्यः पूर्व्वोक्तं पठन्ति ॥

विश्वामित्रः ॥ साश्चर्य्यम् ॥ अहो नु खलु भोः !

वहति हविरुपांशु ‡ मन्त्रपूतं
भवति तथापि न दक्षिणार्च्चिरग्निः ! ।

---

* तस्यैकबाण इति पाठान्तरम् ।

† तापसाकल्पधारिणा तपस्विवेषपरिग्रहवता । आकल्पो मण्डनं वेष इति रत्नमाला । आकल्पवेशौ नेपथ्यमित्यमरः । पाखण्डेन पाषण्डेन । "पाखण्डः पाषण्ड" इत्यमरटीकायाम् भानुदीक्षितः ।

‡ उपांशु प्रच्छन्नम् । रहः प्रच्छन्नमेकान्तं निःशलाकमुपह्वरम् । उपांशु विजनमिति हलायुधः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमिदमुपगताः * क्रियाप्रभावात्

न मम वशित्वमिमाः प्रयान्ति विद्याः ! † ॥

॥ इति समाधिं नाटयति ॥

विद्याः ॥ पूर्व्वोक्तं पठन्ति ॥

राजा ॥ सत्वरमुपसृत्य ॥ अभयमभयम् भयार्त्तानाम् ; तिष्ठ रे दुरात्मन्! पाखण्डाधम! तिष्ठ ; क एष ते प्रच्छन्न-राक्षसस्य मायाप्रपञ्चः ! तथाहि,

वासो वल्कलमक्षसूत्र-वलयी पाणिर्जटालं शिरः,

कोऽयं वेषपरिग्रहो गुरुतपोदान्तस्य शान्तात्मनः ।

केयं ते शठ ! दुर्मतेरकरुणा बीभत्स-नारी-वध-

क्रीड़ा-पातकिनी मतिर्भज फलं स्वस्याधुना कर्मणः ॥

विश्वामित्रः ॥ संवरणं नाठयन्, सक्रोधम् ॥

एष प्राप्तेन्धनश्रीः ‡ श्रवण-कटुतराक्रोश-सङ्घट्ट-जन्मा

क्षोभादन्तःसमाधि-व्यपगम-पवनो-द्दीप्यमानोरु-दीप्तिः ।

लीलामासाद्य सद्यः क्षय-पवन-समुद्भूत-कल्पान्त-वह्ने-

स्त्रैलोक्य-ग्रास-तृष्णामपनयतु मम क्रोधजो जातवेदाः ॥

---

* उपनता इति पाठान्तरम् ।

† सृष्टि-स्थिति-प्रलय-कर्त्तृतारूपाः ।

‡ प्राप्तेन्धनश्रीः, प्राप्ता आसादिता इन्धनरूपा काष्ठस्वरूपा श्रीः सम्पत्तिर्येन सः । हरिश्चन्द्र एव तत्र क्रोधाग्नेरिन्धनस्वरूपो जात इतिभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्याः ॥ सहर्षम् ॥ प्रियं नः प्रियम् ; विजयतां विजयतां महाराज हरिश्चन्द्र ! ॥

॥ इति निष्क्रान्ताः ॥

विश्वामित्रः ॥ दृष्ट्वा, सक्रोधम् ॥ अये ! कथमसौ * दुरात्मा हरिश्चन्द्रोऽस्माकं श्रेयसामन्तरायः संवृत्तः । तिष्ठ रे क्षत्रियापसद ! तिष्ठ ॥

कामं हरिर्भव विमूढ़ ! भवाथ चन्द्र-
चन्द्रार्द्धमौलिरथवा हरएव भूयाः ।
विद्या-प्रणाश-परिवर्धित-घोर-दीप्तेः
क्रोधानलस्य मम नेन्धनतां प्रयासि ? ॥

अपिच रे मूढ़ !

कान्ताकेलिमयोऽपि भूतकरुणा-†-शान्तोऽप्यसौ संयमी
क्रीड़ा-रूढ़-समाधि-भङ्ग-विकट-भ्रूभङ्ग-भीमाननः ।
दृष्ट्वाऽऽकृष्ट-शरासनं यदकरोत्क्रुद्धः पिनाकी स्मरं,
त्वामप्यद्य दृशा तदेव कुरुते क्रोधादयं कौशिकः ॥

राजा ॥ ससंभ्रममात्मगतम् ॥ अये ! कथं स भगवान् कौशिकोऽयं, ताश्च भगवत्यो विद्याः ! यासां सिद्धयेऽहमप्यस्य पापो-

* कथमयमित्यपि पाठः ।

† भूरिकरुणेति पाठान्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽन्तरायः संवृत्तः। नूनमसमीच्यकारिणा मयाऽतेन्धनेनेव * स्फुरच्छिखाकलापो ज्वलनएव पद्भ्यामाक्रान्तः !

कौशिकः ॥ सक्रोधम् ॥

प्रारब्ध-साधन-विघात-विवृद्ध-मन्योः
शापाय धावति करो मम दक्षिणोऽयम् ।
जातिं स्मरन्नपि चिराय समुज्झितां तां
सव्येतरस्तु मम चापमुपैति पाणिः ॥

इत्युत्तिष्ठति ॥

राजा ॥ सभयमुपसृत्य ॥ भगवन् ! अभिवादये ।

कौशिकः ॥ क्रोधं नाटयति ॥

राजा ॥ पादयोर्निपत्य ॥ भगवन् ! मर्षय मर्षय, स्त्रीजनार्त्त-प्रलाप-माया-वञ्चितस्याविजानतो मे क्षन्तुमर्हसि ।

कौशिकः ॥ दुरात्मन् ! किं नामाविजानतो मे क्षन्तुमर्हसि ! अरे रे क्षुद्र ! न किल नाम भवतोऽहं विदितः ?

जाति-स्वयंग्रहण-दुर्ललितैक-विप्रं †

---

* इन्धनेन दारुणा । काष्ठं दार्विन्धनं त्वेध इत्यमरः ।

† क्षत्रियकुलसम्भूतोऽपि विश्वामित्रस्तपोबलेन स्वयं ब्राह्मणो बभूवेति पौराणिकी वार्त्ता । पुरा किल कान्यकुब्जदेशाधिपः क्षत्रियपुङ्गवो विश्वामित्रः परिभ्रमन्नितश्चेतश्च एकदा वशिष्ठाश्रमं समाससाद । अथ कृतातिथ्येन वशिष्ठेन भोजनार्थं निमन्त्रितो गाधिजः स्वानुचरबाहुल्यं, स्वयोग्यवस्तु-समाकलने मुनेरसामर्थ्यञ्चाकलय्य हृदये, आश्रमान्निर्गन्तुमेव प्रयमभियेम,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्यपद्वसिष्ठ-सुत-कानन-धूमकेतुम् । *

अथ पुनःपुनरनुरुध्यमानोऽनिच्छन्नपि तन्निमन्त्रणं स्वीचकार । महातेजा वशिष्ठस्तु सानुचरस्य तस्य राजर्षेरनुरूपातिथिसत्काराय शबलां नाम कामधेनुमाजुहाव, व्यादिदेश च, शबले ! सबलस्यास्य महाराजस्य परितोषाय राजोचितमुपादेय-मन्नपानादिकमुपाहरस्व । शबला च सर्व्वेषामेव यो यत् कामयामास तस्य तत् तत्क्षणमेव समुपाजहार । तदवलोक्य विश्वामित्रः परं विस्मयमाजगाम, ययाचे च गोशतसहस्र-विनिमयेन तां शबलाम् । वशिष्ठस्तु प्रत्याचचक्षे । अथ यदा सुवर्णभूषित-चतुर्द्दशसहस्र-कुञ्जराणामष्टशत-हिरण्मय-रथानां दशोत्तर-सहस्र-हयानां बहुसहस्र-गवाञ्च विनिमयेनापि महर्षिः शबलां दातुं नैच्छत्, तदा विश्वामित्रो बाहुबलेनैव तां जहार । नीयमाना च सा कामधेनूरुदन्ती महर्षेः शरणमाजगाम, जगाद च, भगवन् ! किमर्थमनपराधाहं परित्यक्ता दयावता भवता ? वशिष्ठेनोक्तं, शबले ! नाहं त्वां परित्यजामि; एषतु राजा महाबलः सबलो बलेनैव त्वां हरति । शबला च प्रत्युवाच, ब्रह्मन् ! न शक्नोति क्षत्रियबलं ब्राह्मबलमतिवर्त्तितुम् । अहमेव दुरात्मनो विश्वामित्रस्य बलं दर्पञ्च विनाशयामि, भवाननुमन्तुमर्हतीति । अथ यदा वशिष्ठेनाभ्यनुज्ञातया तया शबलया कल्पितमनीकं नृपबलमशेषमनाशयत्, वशिष्ठञ्च हन्तुमुद्यतं विश्वामित्रपुत्र-शतं हुङ्कारेणैव भस्मसादकरोत्, तदा हतपुत्रबलो दीनो हृतदर्पो विश्वामित्रः परं निर्व्विवेद, विनियुज्य च राज्येऽवशिष्टमेकं तनयं वशिष्ठ-विनाश-निदान-देवास्त्र-लाभाय हिमवत्-पार्श्वस्थमरण्यमाश्रित्य तपस्तप्तुं समारेभे । ततः कियता कालेन परितोषितात् पिणाकिनो बहुविधमव्यर्थं देवास्त्रं ब्रह्मास्त्रञ्चोपलभ्य वशिष्ठाश्र-ममभिगम्य पुनराहवाय तमाजुहाव । वशिष्ठश्च जलेन ज्वलनमिव ब्रह्मदण्डेन तस्य तत् सकलमपि देवास्त्रं ब्रह्मास्त्रञ्चाशया सहैव विफलीचकार । अथ पुनर्निकृतो विश्वामित्रः परं निर्व्वेदमापन्नः पुनःपुनरात्मानं विनिन्द्य बभाषे "धिग्बलं क्षत्रियबलं, ब्राह्मतेजोबलं बलम् । एकेन ब्रह्मदण्डेन सर्व्वास्त्राणि हतानि मे ॥" अतोऽहं तपोबलेन ब्राह्मणत्वलाभाय सर्व्वात्मना यतिष्ये इति । एवं कृतनिश्चयो विश्वामित्रोऽतितरां तपस्तप्तुं समारेभे । तेनैवचातिकठोरेण तपसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्गान्तराहरण-भीत-जगत्-कृतान्तं *
चण्डाल-याजिनमवैषि न कौषिकं माम् ? ॥ *

क्षत्रियवंश-सम्भूतोऽपि ? स ब्राह्मण्यं ब्रह्मर्षिपदञ्चासमादेति । एतद्विस्तारश्च रामायणस्य अयोध्याकाण्डे द्विपञ्चाशावधि-सप्तषष्टितमपर्य्यन्त-सर्गे द्रष्टव्यः ।

---

* पुरा किल अयोध्यानगरे त्रिशङ्कुर्नामेक्ष्वाकु-कुल-भूषणं भूपतिर्बभूव । स चैकदा स्वशरीरेण सुरलोक-गमनाय यियक्षुः, कुलपुरोहितं वशिष्ठमाहूय स्वसङ्कल्पं न्यवेदयत् । अथ गुरुवशिष्ठेन, अशक्यमेतदित्युक्त्वा प्रत्याख्यातोऽसौ तपस्यता वशिष्ठ-तनय-शतेनाध्युषितां दक्षिणां दिशमगमत् । दृष्ट्वा च तत्र तान् गुरुपुत्रानभिवाद्य प्राञ्जलिः स्वाभिमतं, वशिष्ठ-प्रत्याख्यानञ्च विनिवेद्य सशरीर-स्वर्गारोहण-फलक-यागस्य पौरोहित्याय ययाचे । वशिष्ठ-पुत्रशतेन च, "रे दुर्बुद्धे! यद्गुरोरशक्यं तदस्माकं कः सम्पादयितुमीष्टे, कथं वा त्वं मूलमुत्सृज्य शाखामवलम्बितुमिच्छसि" इत्यभिधाय प्रत्याख्यातस्त्रिशङ्कु-स्तेशममर्षितस्तान् प्रत्युवाच, प्रथमं भवत्पित्रा, ततोऽपि भवद्भिः प्रत्याख्यातोऽहमभीष्ट-यागानुष्ठानायान्यं पौरोहित्ये वृणे इति वो विदितमस्त्विति । वशिष्ठतनयास्तु तस्य तदवमान-वचनमाकर्ण्य रोष-परीतास्त्वं सद्यश्चण्डालतां व्रजेति शेपुः । अथ तस्यामेव रजन्यां त्रिशङ्कूराजश्री-विरहितश्चण्डालाकृतिर्बभूव । तस्य च सचिवाः पौराश्च तं चण्डालदर्शनं पश्यन्तः परितः प्रदुद्रुवुः । अथानुचरैः पौरैश्च परित्यक्तोऽवनिपतिर्विश्वामित्रं तपोनिधिं शरणं ययौ, सविनयं प्रोवाच च, भगवन् ! सशरीर-स्वर्गारोहणाय यष्टुकामोऽहं वशिष्ठेन तत्पुत्रैश्च प्रत्याख्यात इमाञ्च अवस्थाविपर्य्ययं प्रापितः । मया तु बाल्यात् प्रभृति कदापि न सत्याद्विचलितं, नाप्यनुष्ठितं किञ्चिदप्यधर्म्यम् । सर्व्वप्रयत्नैश्च परं सर्व्वदैव गुरवः परितोषितास्तथापि मे दशाविपर्य्ययो जात इति मन्ये शुभाशुभ-प्राप्तौ पौरुषं निरर्थकं, दैवमेवात्र मूलमिति । सोऽहमधुना भवन्तमृते नान्यमुपायं पश्यामि । भवांश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ भगवन्! प्रसीद प्रसीद, नैवमवगन्तुमर्हसि ॥

शरणागतं मां न परित्यक्तुमर्हतीति । विश्वामित्रश्च तद्वचनं श्रुत्वा विविधैर्वचनविन्यासैस्तं समाश्वास्य पूर्वोपजात-मन्युवैरनिर्यातनायैवच, तस्य सशरीर-स्वर्गारोहणफलक-यागानुष्ठानाय तत् पौरोहित्य-करणाय च प्रतिज्ञाय सर्वानेव शिष्यानाजुहाव, व्यादिदेश च, यूयमुपाहरत यज्ञोपकरणानि, निमन्त्र्य च मुनिगणानानयध्वम् । अथ शिष्यास्तदनुज्ञया सर्वांस्तपोनामन्त्र्य प्रतिनिवृत्ताः प्राञ्जलयो निवेदयामासुः । गुरो ! सर्वैरेव महर्षिभिर्भवदनुज्ञा शिरसि धृता, परन्तु वशिष्ठ-पुत्रशतेन रोषपरीतेन वयं प्रत्याख्याताः कथिताश्च "यत्र यज्ञे क्षत्रियो याजकश्चण्डालो यियक्षुस्तत्र कथममरैर्हविर्भोक्ष्यन्ते, केवलं ब्राह्मणाश्चाण्डालान्न-भोजनेन पतिताः सुर-सदन-गमनाधिकारात् प्रच्यविष्यन्ते । अथ शिष्यमुखात्तदाकर्ण्य भगवान् विश्वामित्रः कोपाकुलितस्तान् शापेन भस्मसात् चकार, व्याजहार च सर्वान् सदस्यान् "अयमभीप्सति शरणागतः सत्यसन्धो राजा धार्म्मिकस्त्रिशङ्कुः सशरीर-सुरलोक-गमनाय, भवन्तो यज्ञायानुजानन्तु" तच्छ्रुत्वा महर्षयः सर्व्वे शापभयाद्भीता यागानुष्ठानायानुमेनिरे । ततो यज्ञे प्रवृत्ते विश्वामित्रः स्वयमध्वर्युरभवत्, शंसितव्रता मुनयश्च ऋत्विजोऽभवन् । अथ यदा यज्ञभागार्थमाहूता देवगणा नाभ्यगच्छन्, तदा कोपाविष्टो महामुनिर्विश्वामित्रः स्रुवमुद्यम्य व्याजहार, त्रिशङ्को ! मम चिरोपार्ज्जित-तपोबलेन त्वं सशरीरो दिवं व्रज । इत्युक्तवति भगवति विश्वामित्रे त्रिशङ्कुः स्वर्गगमनायाकाशमार्गमारुरोह । अथ तदवलोक्य सुरपतिः सुरगणैः सहेदमब्रवीत्, रे गुरुशापोपहत स्वर्गानधिकारिन् त्रिशङ्को ! भूमौ पत, न ते सम्प्रतस्वर्ते सुरसदने स्थानम् । महेन्द्रेणैवमुक्तस्त्रिशङ्कुर्दिवोऽपतत्, अवाक्शिराश्च पाहि पाहीति विश्वामित्रमुपाक्रोशत् । तदा तदाकर्ण्य भृशं क्रुद्धो विश्वामित्रस्तिष्ठ तिष्ठेत्युवाच । सुतरां त्रिशङ्कुर्द्यावापृथिव्योरन्तराल एव तस्थौ । अथ स्वर्गान्तरकरणे कृतनिश्चयो विश्वामित्रो दक्षिणस्यां दिशि अपरं सप्तर्षिमण्डलं नक्षत्रकुलञ्चासृजत्, अपरानिन्द्रादीन् देवांश्च स्रष्टुमुपचक्रमे । ततस्तदवलोक्य सचकितैः सुरगणैः सानुनयं निवारितेन तेन विश्वामित्रेणाभिहितं "नाहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्नक्षयादिषु तथाविहितात्मवृत्तिं *
राज-प्रतिग्रह-पराङ्मुख-मानसं त्वाम् ।
आड़ीवक-प्रधन-कम्पित-जीवलोकं †
कस्तेजसां च तपसां च निधिं न वेत्ति ॥

प्रतिज्ञामन्यथा कर्त्तुमुत्सहे, अतो मत्सृष्टानि नक्षत्रादीनि वैश्वानर-पथाद्बहिस्तिष्ठन्तु, त्रिशङ्कुश्चापि दक्षिणस्यां दिशि स्वप्रभया ज्वलन्नवाक्शिरा एव तिष्ठतु" इति । अथैतदाकर्ण्य परमप्रीतेन तेन सुरगणेन प्रस्थितम् ॥ एतद्विस्तारश्च रामायणस्यायोध्याकाण्डे द्विपञ्चाशत्तमावधि-द्विषष्टितम-पर्य्यन्त-सर्गे द्रष्टव्यः ।

---

* अन्नक्षयादिषु, दुर्भिक्षादिसमयेषु । तथाविहितात्मवृत्तिं, तथा तेन प्रकारेण अर्थात् चण्डालगृहात् अपहृतस्य श्व-जघन-मांसस्य भक्षणोद्यमेन विहिता कृता आत्मवृत्तिर्जीवनधारणोपायो येन तम् । एकदा दुर्भिक्षसमये क्षुधार्त्तो विश्वामित्रश्चण्डाल-गृहं प्रविश्य कुक्कुर-जघन-मांसमपहृत्य देवेभ्यो विनिवेद्य भोक्तुं प्रवृत्तः । देवराजश्च तदवलोक्य जल-वर्षणेन दुर्भिक्षावसानमकरोदिति पौराणिकी वार्त्ता । एतदुपाख्यानस्य विस्तारो महाभारतस्य शान्तिपर्व्वणि १४१ अध्याये, कलिकातामुद्रितपुस्तकस्य ५५३ पृष्ठायां द्रष्टव्यः ।

† आड़ीवक-प्रधन-कम्पित-जीवलोकमिति विशेषणं हरिश्चन्द्रेणोक्ततया न सङ्गच्छते । यस्य मृत्युरेव आड़ीवक-युद्धस्य कारणं स कथं तदनागतमाड़िवकयुद्धवृत्तान्तमवगच्छति वर्णयति च ॥ पुरा किल काल-कवलिते सदारतनये हरिश्चन्द्रे महामुनिर्वशिष्ठो द्वादशाब्दान्ते गङ्गावासात् प्रत्याजगाम, शुश्राव च विश्वामित्रविचेष्टितमुदारकर्म्मणो हरिश्चन्द्रस्यापि शोचनीयं विशसनम् । अथ स कोपाकुलितस्तं गाधिसुतं "वको भव" इति शशाप । गाधिसुतश्च" त्वमप्याड़िर्भवस्व" इति तं प्रतिशशाप । अथ परस्परशापात् विहङ्गमतामापन्नौ तौ महाबलौ पक्षनखचञ्चु-प्रहरणेन षड्‌कालं युयुधाते । तयोः प्रकाण्डवपुषोः पक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्तु भीरुजनार्त्तप्रलापमुपश्रुत्य * इदमुपक्रान्तम्; स्वधर्माक्षिप्त-चेतसस्त्वासविजानतो मे चन्तुमर्हसीति विज्ञापयामि ।

कौशिकः ॥ दुरात्मन्! कथय कथय, कश्च ते धर्म इति ।

राजा ॥ भगवन्!

दातव्यं, रक्षितव्यं च, योद्धव्यं क्षत्रियैरिति ।
गीतः पुराणैर्मुनिभिरेष धर्म्मः सनातनः ।।

कौशिकः ।। किं नाम? ॥ दातव्यमित्यादि पठति ॥

राजा ॥ अथकिम् ।

कौशिकः ॥ यद्येवं, कथय, कस्मै दातव्यं, कश्च रक्षणीयः, केन सह योद्धव्यम्?

राजा ॥ भगवन्! श्रूयताम् ।

कौशिकः ॥ कथ्यताम् ।

राजा ॥

गुणवद्भ्यो द्विजातिभ्यो देयं, रक्ष्या भयार्द्दिताः ।

पवनेन पर्व्वताः भेतुः पादप्रहारेण च पृथिवी चकम्पे, बहवः प्राणिनश्च विलयमगमन् । अथासन्नमकाल-प्रलयमालोक्य लोकानुग्रहार्थं लोकेशस्तयोः सकाशमाजगाम, सान्त्वयित्वा समराद्विनिवार्य्यचोभयोस्तिर्य्यग्भावमुपानुदत् । शापमुक्तौ च तौ पितामहादेशेन परिष्वज्य परस्परं क्षमयामासतुरिति । एतद्विस्तारश्च मार्कण्डेयपुराणस्य नवमाध्याये द्रष्टव्यः ।

---

* उपक्रम्येति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरातिभिश्च योद्धव्यमिति मे निश्चिता मतिः ॥

कौशिकः ॥ दुरात्मन्! यद्येवं मन्यसे, तदा दीयतामस्मभ्यं विद्यातपोऽनुरूपं किञ्चित् ।

राजा ॥ सहर्षम् ॥ नन्वनुगृहीतस्तर्हि भगवता वैवस्वतो वंशः; तत् प्रसीद भगवन्! प्रसीद ।

नार्हन्ति सर्व्वभुवनान्यपि दक्षिणायै,
सर्व्वस्व-दान-विनिवेदन-कुण्ठ-शक्तिः । *
पूर्णां धनैः कुशिकनन्दन! तुभ्यमद्य
तत्स्वामिमां वसुमतीं विनिवेदयामि ॥

कौशिकः ॥ साश्चर्य्यमात्मगतम् ॥ भवत्वेवं तावत् ॥ प्रकाशम् ॥ राजन्! स्वस्ति, किन्तु नादक्षिणं दानमामनन्ति, तदर्हसि दक्षिणां दातुमिदानीम् ।

राजा॥ सव्रीड़मात्मगतम् ॥ किमत्र प्रतिपत्तव्यम् ॥ चिरं विचिन्त्य, सहर्षम् ॥ भवत्वेवं तावत् ॥ प्रकाशम् ॥ भगवन्!

समुपाहृत्य दास्यामि हेम्नां लक्षञ्च दक्षिणाम् ।
अद्यप्रभृति मे मासमवधिं क्षन्तुमर्हसि ॥

---

* सकलमेव भुवनं यस्यामित-तपो-निधानस्य दक्षिणार्हमपि न भवति, तस्मै केवलमिदमधिकृतमवनीमण्डलं विनिवेद्य कथं निर्वृत-हृदयो भवेयमिति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौशिकः ॥ अनुमतोऽयमवधिः, किन्तु परिहृत्य वसुमतीमन्यतः समुपाहृत्य दातव्यम् ।

राजा ॥ साशङ्कमात्मगतम् ॥ कथमत्र प्रतिविधेयम् ।। विचिन्त्य, सहर्षम् ॥ हन्त ! लब्धं प्रतिविधानं, यतोऽस्ति किल भगवतः शिवस्य परिग्रहः परं चेत्रम् ।

वाराणसीति वसुधातल-भोग-भिन्नां
यामन्तरिच्चनगरीं मुनयो वदन्ति ।
अद्धेयमागमदृशो विदुरन्तरालं
वालाग्रभाग-परिपाटि-सहस्र-सूच्मम् ।। *

तत आहृत्य दास्ये ।। प्रकाशम् ॥ भगवन् ! यदादिशसि ।। आभरणान्यवतार्य ॥ भगवन् !

---

* मुनयः, वाराणसीति नाम्ना ख्यातां, वसुधातलभोगभिन्नां, वसूनि धनानि धत्ते इति वसुधा पृथिवी । वसुधायास्तलं वसुधातलं, तत्र यो भोगः सर्पशरीरं वासुकिशरीरमित्यर्थः, तस्मात् भिन्नाम् । वाराणसी न फणिफणायां संस्थापितेति प्रसिद्धिः । अथवा वसुधातलस्य यो भोगः उपभोगस्तेन हेतुना भिन्नां स्वर्गादित्यर्थः । याम् । अन्तरिच्चनगरीं आकाशपुरीं स्वर्गपुरीं वा । वदन्ति कथयन्ति ।। आगमदृशः आगमः शास्त्रं दृक् चच्चुर्येषां ते पण्डिताः । वालाग्रभाग-परिपाटि-सहस्र-सूच्मां, वालस्य केशस्य यः अग्रभागः, तस्य यत् परिपाटि-सहस्रं रचना-नैपुण्य-सहस्रतमांशस्तद्वत् सूच्मम् । श्रद्धेयं विश्वास्यम्, अन्तरालं व्यवधानं विदुः जानन्ति । वाराणसी-पृथिव्योर्व्यवधानं केशाग्र-सहस्रतमांशवत् सूच्मतममिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एताः श्रियो भगवती वसुधा तथेयम्
अस्त्राण्यसूनि नृपलाञ्छनमेष मौलिः ।
तद्दर्शनादनुगृहाण मयोपनीतम्
एतत्पुनः कुशिकनन्दन ! पादयोस्ते ॥

इति पादयोर्निपत्योत्थाय ॥ सहर्षमात्मगतम् ॥ दिष्ट्या फलित-मिदानीमायास-भूयिष्ठेनापि मे राज्यभारेण ॥ सानन्दम् ॥

मया मुनेरयं मन्युर्मौ वज्र इति शङ्कितः ।
स एष कुसुमापीडः पतितो मम मूर्द्धनि ॥

भगवति वसुन्धरे ! तदियमाशृष्टासि ।

वैवस्वतै र्नृपतिभिः किल लोकधात्रि !
त्वं देवि ! वीर-यशसा सह रक्षितासि ।
त्यक्ता मया यदसि दुर्लभ-पात्र-लोभा-
देकं क्षमस्व मम दुर्नयमेनमेव ॥

तद्यावदयोध्यां गत्वा, भगवतः प्रतिश्रुतं सम्पाद्य, दक्षिणोपार्जनाय वाराणसीमेव गच्छामि ॥ प्रकाशम् ॥ भगवन् ! इतोऽयोध्यां गत्वा कृतकृत्यं निर्वर्त्य दक्षिणोपार्जनाय समाज्ञापयितुमर्हसि । *

---

* मामाज्ञापयितुमिति पुस्तकान्तरस्य पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौशिकः ॥ साश्चर्य्यमात्मगतम् ॥ अहो दुरात्मनः स्थैर्य्यं महानुभावता च !! दुरात्मन् ! अचिराद्द्रक्ष्यामि ते शौण्डीर्य्यम् ।

तथाहि ॥

पश्यामि यावज्ज्वलितं न सत्या-
द्राज्यादिव स्वादचिराद्भवन्तम् ।
त्वद्दुर्नयोद्दीपित-तीव्र-तेजा-
स्तावन्न मे शान्तिमुपैति मन्युः ॥

॥ प्रकाशम् ॥ राजन् [illegible] मिव [illegible] को दोषः ।

[illegible] ॥ [illegible] ? भगवति ! [illegible]

॥ इति निष्क्रा[illegible]

[illegible]

॥ इति आर्य्य-क्षेमीश्वर-कृते चण्ड[illegible] पर्[illegible]

द्वितीयोऽङ्कः ॥

[illegible]स

[illegible] दासी, द[illegible]

[illegible]म्

[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्याद्भुतं कथयतश्चरितं भवस्य
रोमाञ्च-भिन्न-कण-भस्म-घनाङ्गयष्टेः । *
व्यावल्गित-भ्रु नयनत्रयमाविरासीद्-
वेल्लच्छशाङ्क-शकल-† श्चपलश्च मौलिः ।।

अद्यासाविह प्रवेक्ष्यतीति समं देव्या देवो मृगाङ्क-मौलि-रपि पर्युत्सुक एव । तद्यावदहमपि भगवतः पूजां निर्वर्त्य सज्जी-भवामि ।

॥ इति निष्क्रान्तः ॥ प्रवेशकः ॥ ‡

॥ ततः प्रविश ... ष्टोसि । ... ॥

वैवस्वते नृपतिभिः किल लोक...
दत्वैतां द्विवि ! वीर-प्रसूधां प्रीत्या प्रसन्नं मनः,
... यत्ता मया यद्द...णां विधिवशाद्गुर्वीमनिर्यातिताम् ।
देकं च ... म ...

...द्याल् रोमाञ्चेन पुलकेन भि... पृथग्भूता कणा यस्य तत्, तादृशं यत् भस्म ...ायं ॥ "भूति र्भस्मनि ... गाम ३१० पृ ॥ अङ्गं यष्टिरिव इत्यङ्गयष्टिः शरीर...डः । रोमाञ्च-भिन्न... भस्मना घनः अङ्गयष्टिर्यस्य स तस्य । "दण्ड... यो यष्टिश्च कथ्यते" इला... त्यं ...

...रि वेल्लत् प्रचलत् शशाङ्क-श... द्कला यस्य सः ॥

"प्रवेशकोऽनुदात्तोक्त्या नीचप... जितः । अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भ... यथा ॥ अङ्कद्वयान्तरिति... तरस्य ...टस्य प्रतिषेधस्य ।" साहि १४६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तव्यो न धनागमोऽस्य विषये स्थानं भवानीपते-
राङ्कर्यन्न वसुन्धरेति तदहं वाराणसीं प्रस्थितः * ॥

चिन्तां नाटयित्वा दीर्घं निःश्वस्य ॥ कष्टं भोः कष्टम् ।

दाराः सूनुरयं शरीरकमिदं त्यागावशिष्टं त्रयं,
संप्राप्तोऽवधिरद्य सत्यमपरित्याज्यं मुनिः कोपनः ।
ब्रह्मस्वोपहृतं च जीवितमिदं न त्यक्तुमप्युत्सहे,
किंकर्तव्य-विचार-मूढ़-मनसः सर्व्वत्र शून्या दिशः ॥

॥ अग्रतोऽवलोक्य [illegible] मिव कथमियं वाराणसी ! भगवति
वाराणसि ! नमस्ते ॥ [illegible] ? भगवति [illegible]

यद्वाञ्छन्ति च्चपित-तमसो ब्रह्म [illegible]
प्रव्रज्याभिः श्रुतशमदमा नाशकै [illegible]
तद्देहान्ते कथयति हरस्तारकं [illegible] मस्मिन्
प्राणत्यागाद्भवति न पुनर्जन्म [illegible] येन जन्तुः ॥

* अस्य भवानीपतेः शिवस्य अधिक [illegible] वाराणसीतीर्थे धनागमो [illegible] नो-
पार्ज्जनं न कर्त्तव्य इति स्थानं युक्तम् [illegible] यत् यस्मात् वाराणसीं
वसुन्धरा इति न आङ्कः कथयति [illegible] इति शेषः । तत् तस्मात् अहं
प्रस्थितः, वाराणसीमुद्दिश्येति शेषः [illegible] परिहृत्य पृथिवीमन्यत्रो धनोपार्ज्जन-
स्यावश्यकतेति भावः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपिच

विमुच्यन्ते जन्तोरिह निविड़-संसार-निगड़ाः
शिरस्तद्दैरिञ्चं न्यपतदिह हस्तात् पशुपतेः ।
विमुक्तस्तत्पापादभवदविमुक्तः स भगवान्
न मुक्तं तेनैतत् सह दयितया चेत्रमसमम् ॥

तत्केनोपायेन मुनेरानृण्यमुपगच्छामि । सचिन्तम् ॥

किं जित्वा धनमाहरामि धनदं त्यक्तश्रियः किं जयै-
र्याच्ञा दैन्यमपि द्विजा[illegible] न क्षत्रियाः कुर्वते ।
[illegible]टोसि । [illegible]
वैन[illegible]ते नृपतिभिः किल [illegible] ष्किञ्चनस्याद्य मे
सर्वं देवि ! वीर-वसु[illegible]धवशान्नैवास्मि कालक्षमः ॥

तर्हि मया स्मृ[illegible]णां[illegible] भाग्यः ! ॥ सम्प्रधार्य्य, सहर्षम् ॥ हन्त
तदहा देकं [illegible] म [illegible]

[illegible]द्य रोम[illegible] आत्मानमेव [illegible]णाय सत्यं रक्षामि शाश्वतम् ।
[illegible] ॥ तस्मिन्नरक्षि[illegible]म [illegible]नं लोकद्वयमरक्षितम् ॥
[illegible]ः । [illegible]

॥ द्विविष्टम्भम् ॥ तद्यावदे[illegible] [illegible]मं रोहिताश्वमनुपालयन्ती दीर्घाध्व-
वि[illegible]न्ता देवी नाग[illegible] दकावदेवाहं सत्वरमुपगम्यात्मनः
स [illegible] हितं सम्पादयामि । [illegible]जितः[illegible]लोक्य ॥ कथं मध्यमह्नः समा-
रू[illegible] भास्वान् । [illegible]स्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४६—१ पृष्ठम् ।

शिरस्तद्वैरिञ्चं न्यपतदिह हस्तात् पशुपतेरित्यस्य व्याख्या ।

पशुपतेः कालभैरवस्य हस्तात् तत् वैरिञ्चं पितामहसम्बन्धीयं शिर इह वाराणसीतीर्थे न्यपतत् । कालभैरवः काशीप्रवेशमात्रेण ब्रह्महत्या-जनित-पापाद्विनिर्म्मुक्तो बभूवेत्यर्थः । एतेन वाराणस्या ब्रह्महत्या-जनित-पापनाशकत्वं सूचितम् । तथाच एकदा महेश्वरमजानन् स्वरूपतो हिरण्य-[illegible]र्भः सगर्व्वमुवाच, अहं जगतां प्रवर्त्तको निवर्त्तको धाता स्वयम्भूरद्वितीय ईश्वरश्च अतो मामनर्च्य न म[illegible] संसारबन्धनादिति । अथ तदाकर्ण्य प्रहसता नारायणांशजेन क्रतुना रो[illegible] [illegible] ? भवति ! [illegible] [illegible]तिश्च, मदनुग्रहेणैवेश्वरत्व-[illegible]भवता भवा[illegible] [illegible] । [illegible] विवदमानौ परस्पर-जयैषिणौ तौ संशयनि[illegible] [illegible]ट्य-समीपमगम-[illegible] । अभिहितञ्च विचार्य्य वेदैर्देवदेवो महेश्वर[illegible] [illegible] [illegible]ो न [illegible]मिथ्ये कोऽपीति । अथाहङ्कारविमोहिते[illegible] [illegible] [illegible]हिरण्य-[illegible]णा सगर्व्वमुक्तं, प्रेतभूमौ निरन्तरमुमया [illegible] [illegible]णो धूलि-धूष[illegible] [illegible] भोगिभोग-विभूषितः स भूतपतिर्भवितुमर्हति[illegible] [illegible]र्व्वः सर्व्वेश्वर इति [illegible] कथयतामेव तेषामन्तरे भगवान् भूतभावनो [illegible] [illegible]यः प्रादुरासीत् । तम[illegible]ोक्य [illegible]धाता व्याजहार, भूतेश ! भवान् भा[illegible] [illegible] पुरा प्रादुरभवत्, रो[illegible] [illegible] रुद्रनाम्ना मया योजितोऽसि, अधुना [illegible] [illegible] मामेव शरणम्, क[illegible]था कृतस्ते क्षेममिति । अथ स्मरहर[illegible] [illegible]तो भैरवाकृतिं कालभैरवं स[illegible] [illegible] पितामहस्य शिरश्छेदनाय वाराण[illegible] [illegible]य च व्यादिदेश । काल[illegible]रवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य दर्पदमनार्थं वामाङ्गुलिनखाग्रेण शिरश्चकर्त्त, ब्रह्महत्या-नाम्नी कन्या च उदभवत्। ब्रह्महत्या कालभैरवमाश्रितवती। कालभैरवस्तु ब्रह्महत्या-परिहाराय "शिरःकपाल-ध्वजवान् भिक्षाशी" इति स्मृत्यनुसारेण हस्ते तद्वैरिञ्चं शिरः समादाय भिक्षार्थं त्रिलोकीं भ्रमितुमारेभे। ब्रह्महत्या च न तं परितत्याज। अथ यदा स कालभैरवः परमपवित्रपुरीं ब्रह्महत्यापनोदनीं वाराणसीं प्राविशत् तदा ब्रह्महत्या काशीप्रवेशानधिकारात् तं परित्यज्य पातालतलमगमत्, वैरिञ्चं शिरश्च कालभैरव-हस्ततलात् न्यपतदिति पौराणिकी वार्त्ता॥ स्कन्दपुराण-काशीखण्डस्य एकत्रिंशत्तमोऽध्यायः॥

...टोस।...

...त्ते नृपतिभिः किल ...

...देवि! वीर-धसु...

...मया ...

...देकं— ...म ...

...घरो... ॥

...

...शि...

...दका...

...जत...

...स्य टस्य...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ी कन्या च
हत्या-परि-
ारेण हस्ते
हत्या च न
त्यापनोदनीं
परित्यज्य
ति पौरा-

तथाहि ।

तपति तपनस्तीक्ष्णं चण्डः स्फुरन्निव कौशिको
वहति परितस्तापं पत्न्या यथा मम मानसम् ।
इयमपि पुनश्छाया दीनां दशां समुपस्थिता
हत-विधिवशाद्दैवोत्पातो निषीदति भूरुहाम् ।।

तदिदमासन्नमवधेः पर्य्यवसानम्, अथवा हरिश्चन्द्रस्यैव ! ।
हा हतोऽस्मि मन्दभाग्यः ! * ॥ इति आत्मानं पातयित्वा सहसोत्थाय सनिर्वेदम् ॥ दुरात्मन् हरिश्चन्द्र हतक !

...मिव ...णां प्राग्
... द्विजः ॥ ... ? सखति ! ...
अपूरयित्व ...द्विजस्य ...
ब्रह्मास्त्र-दग्ध-ज्वलितश्च स...
गमिष्यसि त्वं शठ! कान् प्र...

तद्यावद् वणिग्वीथीमवतीर्य्य ... मनुतिष्ठ... ...गत-प्रायेण तेन मुनिना भवितव्यम् ।। ... सत्वरं परिक्रम्यैका... ...यतः ।

॥ ततः प्रविशति कोपं ... कौशिकः ॥

कौशिकः ॥
प्रणाशाद्विद्यानां ... तानामुपचितो
निरुद्धो दुर्बुद्धे- ...मसृणैस्तस्य चरितैः ।

... दासी, दे...

* मन्दभरम् ... त्यपि पाठः ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिखी वेगादन्तर्ज्वलित-घन-शुष्केन्धन-गतो
वह्निर्धारासिक्तं* विपिनमिव मन्युर्दहति माम् ॥

॥ सामर्षम् ॥ दुरात्मन् हरिश्चन्द्रहतक !

पश्यामि यावज्ज्वलितं न सत्या-
द्राज्यादिव खादचिराद्भवन्तम् ।
त्वद्दुर्नयोद्दीपित-तीव्र-तेजा-
स्तावन्न मे शान्तिमुपैति मन्युः ॥

॥ दृष्ट्वा सविस्मयम् ॥ अये कथमसौ प्राप्त एव दुरात्मा, अथवा
महात्मैव । ... टोऽस्ति । ... आः कथ-
... व्रते नृपतिभिः किल ...
मद्यापि न स... ... था-सुव...नि ?

... देवि ! वीर-प्रसू...

राजा ॥ ... अयं भगवान् कौशिकः ॥ भगवन्
... मया दहरिणां ...
अभिवा...

... देकं ... म

कौ... धिगनार्य ... मद्यापि अलीक-वाङ्माधुर्यैरस्मान्
... रोम ...
... गच्छसि ? ।

... ॥

... ॥ कर्णौ पिधाय ... भगवन् ! मर्षय मर्षय ।

...शिकः ॥ क्रोधं नाटयित्वा ... दुरात्मन् ! अलीक-दान-सम्भा-
वना-ख्यापित-मिथ्यापौरुषप्र...क तिष्ठ तिष्ठ ॥

---

* यदहविर्धारासिक्तमिति पुस्तका... पाठः ॥
† आः कथमसन्मृतानि अद्यापि ... ते क्वचित् पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णेऽवधावपि * ददासि न दक्षिणां मे
वाग्भिस्तु शुष्कमधुराभि-† रुपस्थितोऽसि ।
दत्ताप्रदान-कुपितेन मया विमुक्तः
शापानलस्त्वयि पतत्वयमद्य घोरः ॥

॥ इति शापजलं गृह्णाति ॥

राजा ॥ ससम्भ्रमं पादयोर्निपत्य ॥ भगवन्! प्रसीद प्रसीद, ...र्षय मर्षय ।

अस्तं रवावसम्प्राप्ते यदि नाप्नोषि दक्षिणाम् ।
शापा... ...मिव ...क्षीणो... ॥
...रिजः ॥ ... ? भगवति ! ...
तत् प्रसीद वणिग्... ...भवत...
कौशिकः ॥ शापजलमुपसंहृत्य ॥ भव... ...प्रयच्छ ।
म... ...हमपि द्वितीयं सवनं निर्वर्त्यागच्छ...
॥ इति निष्क्रान्त... ॥

राजा ॥ सनिर्वेदमात्मगतम् ॥ ...दास...
लोकद्वय-प्रतिभयैक-निदान... ...
धिक् प्राणिनाम्पणमहो... ...मघोरम् ।
एकः स एव हि पुम... ...र्मोस्त्वलोके

---

* पूर्णावधावपीति पाठान्तरम् । ...दासी, दे...
...रम्...
† शुष्काः फलसम्पत्ति-विहीना... ...यासुखजनिकाः ताभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षुद्रस्य येन धनिकस्य मुखं न दृष्टम् ।।

॥ परिक्रम्य दृष्ट्वा सहर्षम् ॥ कथमियं वणिग्वीथी ! ॥ शिरसि तृणं दत्त्वा सावष्टम्भम् ॥ भो भोः साधवः !

केनापि खलु कार्य्येण गत्यन्तरमपश्यता ।

लक्षेणायं सुवर्णानामात्मा विक्रीयते मया ।।

तद् गृह्णन्तु भामार्याः ! गृह्णन्तु ॥ आकाशे ॥ किं ब्रूथ ? * किमर्थमिदं त्वया दारुणं कर्म प्रारब्धमिति ? किमनेनातिनिर्बन्धेन विचित्रः खल्वयं जीवलोकः ॥ पुनरन्यतो गत्वा केनापीत्यादि पठित्वा ॥ आकाशे ॥ ... का ... टोसि । ... र्ण, कीदृशश्च ... नैन ... वते नृपतिभिः किल ... ज्ञानमिति

... रवि ! वीर-धर्म ...

॥ स्मित्वा ॥

... मया दृष्ट ... णां

... ते स्वामी तत् करोत्यविचारितम् ...

... देकं ... म ...

... शासनात् ... र्त्तु-र्भृत्यस्य परमो गुणः ।।

... रोम ...

... ॥ किरणं ॥ किं ब्रूथ ... दितरं मूल्यमुक्तवानसि, तत्पुनस्तावदेः ... धीयतामिति ? । ... खेदम् ॥ भो भोः साधवः ! क्षत्रिया... ... , न पुनःपुनरभिध ... ... मीमस्तद् गम्यताम् ।।

... टिका ...

* "किं ब्रवीष्येवमित्यादि ... जतमात्रं मथीति यत् । मुद्देशानु... ... यथ ... स्वादाकाश-भाषितम् ॥" ... स ... टस्य ...

† कीदृशश्च ते विज्ञान ... ... नरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ पुनरन्यतो गत्वा कोनापीत्यादि पठति ॥

॥ नेपथ्ये ॥

अज्जउत्त ! मा क्खु मा क्खु अत्तम्भरो होहि । तधा सुह-संविभाइणिं मं सन्दभाइणिं कादुअ सम्पदं का दे संविभाअ-परम्मुहदा । ता पसीद, मं जेव्व इमस्सिं कज्जे आरोवेहि, अवक्किणो दे दाणिं अ पणओ ।

राजा ॥ सवैलक्ष्यम् ॥ कथमागतैव देवी ! तन्न सम्पन्नमभि-लषितम् ॥

॥ ततः प्रविशति व... मिव ...माना क्लैव्यं नाटयन्ती शैव्या ॥

॥ शैव्या सकरुणा ते... ? भअति ! ... अज्जा

...णध इदो अज्जउत्तेण समअदा... ॥ ...

... बालकः ॥ अज्जा! संपि किणध । ... पि...

राजा ॥ दीर्घमुष्णञ्च निश्वस्य आत्मगत... ...टम् ।

धारा-सिक्त-तृणाग्र-विन्दु-तरलाः ... ग्रामं निरस्ताः ...

स्त्यक्तास्ते सुहृदोऽश्रु-दीन-वदना ... ...सिता-स्ताः प्रज...

दाराणां तनयस्य विक्रयकृतो इत्थं ... यच्चेतसा

...रेण स्फुटितं न सेऽद्य हृद... मन्ये कृतम् ॥

---

* धारया स्रोतसा ॥ " ध...तो रयः स्मृतः" हला ७१ ॥ ...सिक्तेषु ...प्लावितेषु तृणाग्रेषु ये विन्दवः जल... दासी, दं " पृषन्ति विन्द-पृषताः ... आम ...२४ इ ॥ तद्वत् तरलाश्चञ्चलाः ॥ ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैव्या ॥ आकाशे कर्णं दत्त्वा ॥ अज्जा किं भणाध? कीदिसो दे समओ त्ति? परपुरिस-पज्जुवासणं परुच्छिट्ठ भोअणं परिहरिअ सव्व-कम्मकारिणी त्ति । ईदिसो मे समओ ॥ पुनः कर्णं दत्त्वा ॥ किं भणाध? को तुमं दक्खिणा समएण किणिस्सदि त्ति?। ता गच्छध पसीदध, किं तुह्माणं दक्खिणा पओअणं । दिअवरो दीणजणाणुकम्पी अप्पो वा कोवि साधू मं किणिस्सदि ।

॥ ततः प्रविशति उपाध्यायो वटुश्च ॥

उपा ॥ ... कौण्डिन्य ... ... क्रीयते ।
... नृपतिभिः किल ...
वटुः ॥ किं अ... ... दि ।
... ! वीर-धर्म...
उपा ॥ ते... ... गच्छावः ।
... दक्षिणां ...
वटुः ॥ ज... ... तिति जाणवेदि । एदु एदु उअज्झ...
एदु ए... ...
... परिक्रम्य दृष्ट्वा । ...आश्चर्य्यम् । अहो ! रामणीयकं वीथ्या... ।

... दि ।

हेम्ना मेरु-वसुन्धर... ...धे-वैलेव रत्नैरियं
नागैर्नील-पयोद-विभ्रम... ...न्ध्यस्थलीवोन्मदैः ।

...रुस्थलीव सुवर्णमयीत्यर्थः ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्थं प्रार्थितमर्थिनां विदधती दिव्यांशुकोत्पल्लवा
सेयं कल्पलतेव कस्य विपणिर्लोलं विधत्ते मनः ॥

चटुः ॥ उअज्झाअ! जहिं एसो गरुओ जणसंमद्दो दीसइ तहिं तीए होदव्वं त्ति तक्केमि ॥ उपसृत्य ॥ अज्जा! अन्तरं अन्तरं ।

उपा ॥ अहो! अतिबलवान् संमर्दः ।

...व्या ॥ सवैलक्ष्यम् ॥ किणध मं अज्जा! किणध ॥ इत्यादि ...नः पठति ॥

वाल्ङः ॥ सम्पि । ...मिव

उपा ॥ दृष्ट्वा ... ... ? भवति! कीदृशास्ते ...यः ?

... वैव्या ॥ परपुरिस पज्जुवासणं पडच्छि... परिहरिअ ...कम्मकारिणी त्ति ।

वाल ॥ सम्पि ।

उपा ॥ सहर्षम् ॥ सुष्टु खल्वयन्ते ...ः । तदमुनैव स...ये- ...सद्गृहे विश्रम्यताम् । पती समाश्रि... ...चर्य्या-पराधीनतया न ...टहावेचाच्चमा । तद्गृह्यत... ।

...व्या ॥ सहर्षम् ॥ अणुगह्वि... ...जं अज्ज आणवेदि त्ति ...दासी, ...

उपा ॥ चिरमवलोक्य सविस्मयम् ... ...म् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरो यदवगुण्ठितं, सहज-रूढ़-लज्जानतं
गतञ्च परिमन्थरं, चरणकोटिलग्ने दृशौ ।
वचः परिमितं च यन्मधुर-मन्दमन्दाक्षरं,
निजं तदियमङ्गना वदति नूनमुच्चैः कुलम् ॥

॥ सचिन्तम् ॥ न युक्तमस्याकृतिविशेषस्येदमवस्थान्तरम् । तत् कथमिमां दशामनुप्राप्ता । भवत्वेवं तावत् ॥ प्रकाशम् ॥ अयि ! जीवति ते भर्त्ता ? ।

शैव्या ॥ शिरसा संज्ञां ददाति ।

राजा ॥ निश्वस्यात्मगतम् ॥ कष्टासि । ... जीवतः किम कल-त्रस्येदमवस्थान्तरम् । ... किल ...

उपा ॥ वि... वीर-... स्यात् ? ।

शैव्या ॥ सा... नमवलोकयति ।

उपा ॥ ... सविस्मय... ॥ अये कथमयमस्या भर्त्ता ॥ निर्वर्ण्य ... दम् ॥

दृषस्कन्धं म... दृ-कर-पीनायतभुजं
वपु-र्व्यूढ़ोरस्क... भुवन-रचा-चममिदम् ।
... त्यं ...
दशां मौलौ ... -समुचिते किञ्चिदसह्यो
नरं वामारम्भं ... न विधाता प्रहरति ॥

॥ ... त्य सास्रम् ॥ भो मह... रस ... स्वदुःख-सम्भाग-विभागि...

दुरदृष्टोमेतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मां कर्त्तुमर्हसि । तत् कथ्यतां किमर्थमेवं त्वयारब्धामिति ।

राजा ॥ विचिन्त्य सवैक्लव्यमात्मगतम् ॥ न युक्तमस्य साधोर्वचनमन्यथाकर्त्तुम् ॥ प्रकाशम् ॥ भोः साधो ! न विस्तरस्येदानीं देशकालौ । ततः समासतः कथयामि श्रूयताम् । ब्रह्मस्वपीड़ितेनेदं मया प्रारब्धम् । अतःपरं न ममातिनिर्वन्धयितुमर्हसि ।

उपा ॥ तेन हि तत् प्रतिगृह्यतां नो धनम् ।

राजा ॥ कर्णौ पिधाय ॥ भो भोः साधो ! प्रथम-वर्ण-वृत्तिरियं प्रतिषिद्धा ... मिव यदि मामनुकम्पनीयं मन्यसे, तन्मूल्यसम्बन्धेन दात ... ॥

शैव्या ॥ ससम्भ्रममुपगम्य सविनयमञ्जलिं बद्धा ॥ णाहदि मं पढ़मं ... अज्जो अदिक्कमिदुं । ता ... गेह्नदु मं, एसह्मि दे ... रणागदा ।

उपा ॥ ... सास्त्रम् ॥ भवति !

लब्धार्द्धं यदिदं हेम्नां युव ... व तद्धनम् ।

परस्परानुरोधेन यद्युक्तं त ... यताम् ॥

॥ इति धनमर्पयति ॥

शैव्या ॥ गृहीत्वा ॥ स ... दिट्ठिआ अद्धावसिट्ठ पड़िसाभारो दाणिं अज्जउत्तो ... दत्थि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपा ॥ स्वगतम् ॥ न युक्तमिदानीमनयोर्वैक्लव्यमवलोकयितुम् ।
॥इति निर्गन्तुमिच्छति ॥

शैव्या ॥ मुहुत्तग्रं पड़िवालेदु अज्जो, जाव अज्जउत्तं सुसंदिट्टं करेमि ।

उपा ॥ एष कौण्डिन्यस्तिष्ठति । इति निष्क्रान्तः ॥

शैव्या ॥ राज्ञः पटे धनं बद्ध्वा ॥ अणुमस्सदु मं एदस्स दिअवरस्स दासित्तणे अज्जउत्तो ।

राजा ॥ सवैक्लव्यम् ॥ नन्वनुमतमेव प्रभवतो विधेः ॥ सोपालम्भमात्मगतम् । आकाशे ॥ ननु भो [illegible]टासि ।

देवीभावं नीत्वा प[illegible] किल [illegible] परिचारिका कृता यदियम् ।
तदिदं चूड़ारत्नं [illegible] आभरणत्वमुपनीतम् ॥

॥ सविशेषकरुणम् ॥ भोः [illegible]ष्टं !

मम विधि-नि[illegible] मन्दबुद्धे-
र्भुवममुना सुत[illegible]र-विक्रयेण ।
निज-कुल-परि[illegible]-नन्न-मूर्त्ते-
रपि सवितुर्मलि[illegible]नं [illegible] मुखश्रीः ॥

॥आत्मानं संस्तभ्य ॥ प्रकाशम् ॥ [illegible] !

आराध्योऽयं ब्राह्म[illegible]रस[illegible]ग्रायः
पत्नी चास्य प्रीति[illegible]र्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रक्ष्याः प्राणा बालकः पालनीयो
यद्यद्दैवं प्राप्ति तत्तद्विधेयम् ॥

शैव्या ॥ जं अज्जो आणवेदि ॥ इति निर्गन्तुमिच्छति राजानमवलोक्य वैक्लव्यं नाटयति ।

बटुः ॥ सकोपम् ॥ आअच्छ भोदी ! आअच्छ, दूरं गदो उअज्झाओ ।

शैव्या ॥ सानुनयम् ॥ मुहुत्तअं पड़िवालेसु मं, जाव अहं अज्जउत्तमुहं सुदिट्टं करेमि ।

राजा ॥ वैक्लव्यं नाट[illegible] ॥ प्रिये! विरम्यतां दुःखमास्ते ब्राह्मणः ।
[illegible]मिव

शैव्या ॥ [illegible] परिक्रामति ।
[illegible] ॥

बालकः ॥ आवुक ! कहिं अम्ब[illegible]दि ।

राजा ॥ सखेदम् ॥ यत्र ते पितुः कल[illegible]सी भूत्वा गम्यते ।*

[illegible]लकः ॥ अरे वटुअ ! कहिं तुमं अम्बं णेदुमिच्छसि ॥ इति [illegible]ः पटान्तं धारयति ।

बटुः ॥ सकोपम् ॥ अवेहि गर्भदास । इति निक्षा पातयति ।

बालकः ॥ साधरभङ्गं पितरौ पश्यति ।

उभौ ॥ सास्रमवलोकयतः ।

राजा ॥ भो ब्राह्मण ! † अनपराद्धं किल शैशवं,

* ते तव पितुः कलत्रं भूत्वा यत्र दासी, दासीत्वमापन्नेत्यर्थः । तत्र गम्यते ।
† महाब्राह्मण इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्नार्हस्येवं कर्त्तुम् ॥ बालकमुत्थाप्य शिरस्याघ्रायालिङ्ग्य च ॥ सवैक्लव्यम् ॥

किं वत्स ! मन्युभर-विस्फुरिताधरोष्ठः
पापस्य पश्यसि मुखं मम निर्घृणस्य ।
येषां प्रिया न शिशवः पिशिताशनानां
तेषामपि प्रियतमा वनिता तिरश्चाम् ॥

तत् किं मां चाण्डालमनुगच्छसि, मातरमेवानुगच्छ ॥ इ... वैक्लव्यं नाटयति ।

शैव्या ॥ अज्जउत्त ! किं सं...सि । ... ...अन्तो महे-सिणो कज्जं सिढिलेसि ...कल ... परिक्रामति । *

॥ ...प्रविशति कौशिकः ॥

कौशिकः ॥ आः ! कथमद्याधुनापि न मे सम्भृतानि द...सुवर्णानि ?

राजा ॥ श्रुत्वा ससम्भ्रममुत्थाय ॥ भगवन् ! क्षम्यतां तावदर्द्धम् ।

कौशिकः ॥ आः कृतं अर्द्धेन । यदि प्रतिश्रुतमवश्यं देयं मन्यते भवान्, तन्निःशेषमेव प्रयच्छ ।

---

* बाल । श्रावुक ! परित्ताहि परित्ताहि । इति निष्क्रान्तः । रा... चिरमवलोक्य । हाहतोऽस्मीति पातयत्यात्मानम् ॥ इति वा पाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥नेपथ्ये ॥

धिक् तपो धिग् व्रतमिदं धिग्ज्ञानं धिग्बहुश्रुतम् ।
नीतवानसि यद्ब्रह्मन् ! हरिश्चन्द्रमिमां दशाम् ॥

कौशिकः ॥ श्रुत्वा सक्रोधम् ॥ आः के पुनरमी धिक् शब्देन मां गर्हयन्ति ॥ ऊर्द्धमवलोक्य ॥ अये ! कथममी विमानचारिणो विश्वेदेवाः ॥ क्रोधं नाटयित्वा, कमण्डलुवारिणोपस्पृश्य, शापजलं [illegible]त्वा ॥ धिगनात्मज्ञाः ! अरेरे क्षुद्र-क्षत्रिय-पक्षपातिनः ! ।

पश्चानामपि वो जन्म क्षत्रयोनौ भविष्यति ।
तथापि ब्राह्मणो[illegible]मिव कुमारान् वो हनिष्यति ॥

॥ पुनरूर्द्धमवलोक्य सहे[illegible] ॥ [illegible]मी ।

मद्दृष्टिपात-भय-कम्पित-ल[illegible]ण्ठा-
टङ्कार-पूरित-वियत्-स्खलतो [illegible]मानात् ।
वेल्लद्दनांशुक-*विदष्ट-किरीट-कोटि-
प्रभ्रष्ट-कुण्डलमवाङ्मुखमापतन्ति ॥

राजा ॥ ऊर्द्धमवलोक्य सभयम् ॥ अहो प्रभावस्तपसां ! स्थाने खलु क्लिश्यति हरिश्चन्द्रः । भगवन् ! अलमन्यथा सम्भावितेन ।

गृह्यतामर्जितमिदं भार्य्या-तनय-विक्रयात् ।
शेषस्यार्थे करिष्यामि चाण्डालेष्वात्मविक्रयम् ॥

---

* वल्लद्दलांशुक इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौशिकः ॥ सक्रोधम् ॥ कृतमर्द्धेन नन्वशेषमेव दीयताम्।

राजा ॥ भोः साधवः ! ॥ केनापीत्यादि पठति ।

॥ ततः प्रविशति चाण्डालवेषः सानुचरो धर्म्मः ॥

धर्म्मः ॥ स्वगतम् ॥

मया ध्रियन्ते भुवनान्यमूनि
सत्यञ्च मां तत्सहितं बिभर्त्ति ।
परीक्षितुं सत्यमतोऽस्य राज्ञः
कृतो मया जातिपरिग्रहोऽयम् ॥

॥ चिरं ध्यात्वा साश्चर्यम् ॥ प्रणि[illegible] पश्यन् तस्य राजर्षेर्हरिश्चन्द्रस्य तुल्यं न पश्या[illegible] नव गच्छामि । परिक्रम्य प्रकाशम् ॥ अले [illegible]ालमेत्तका ! गच्छिदे तए अल[illegible] पेट्टालके ? ।

अनुचरः ॥ भट्टलआ ! किं तए सुवसागाले काट्टव्वे [illegible] शुले पाट्टव्वे ? ।

धर्मः ॥ अले किं तव एदिणा पुच्छिदेण पओअणं ॥* इति परिक्रामति ।

राजा ॥ केनापीत्यादि पठति । स्वार्द्धेनेत्यादि पठति च सर्व्वतो[illegible]

---

* अड़े ! तव किं इमिणा सुणिदेण इयि वा पाठः । एतन्मतानुस[illegible] चाण्डालस्योक्तौ यत्र यत्र अले तत्र तत्रैव अड़े इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोक्य सखेदम् ॥ कथं मया मन्दभाग्येन न कश्चिदर्थो हा हतोऽस्मि ! । इति मूर्च्छितः पतति ।

धर्मः ॥ आकर्ण्य दृष्ट्वा स्वगतम् ॥ कथमसौ महासत्त्वो मोहमुपगतस्तिष्ठति । भवत्वेवं तावत् ॥ ससम्भ्रममुपगम्य प्रकाशम् ॥ अले ! उत्थेहि अंहके तए अत्थी । ता गेह्ण एदं जधापत्थिदं प्पुवसं ।

राजा ॥ सहर्षमुत्थाय ॥ ओः साधो ! उपनीयताम् ॥ दृष्ट्वा सवि-[illegible]म् ॥ भद्र ! भवानर्थी ? ।

धर्मः ॥ वाढ़ं हगे तए अत्थी ।

राजा ॥ तत् को [illegible]ऽसि ?

धर्मः ॥ [illegible] ॥

शव्व-मशाणाहिवइ गुम्मट्ठाणाहि[illegible]णं पञ्चइदे ।
वञ्फट्ठाण-णिउत्ते चण्डाल-महत्तले-क्खु हगे ॥

राजा ॥ सावेगमपहृत्य कौशिकस्य पादयो-र्निपत्य॥ भगवन् ! प्रसीद, भगवन् ! प्रसीद ।

तवैव दासतां गत्वा वरमानृण्यमस्तु मे ।
न दृष्टा न श्रुता चेयं ब्रह्मन् ! चाण्डालदासता ॥

कौशि ॥ धिङ्मूर्ख ! स्वयं दासास्तपस्विनः । तत्किं त्वया [illegible]धीन मे क्रियते ।

राजा ॥ सानुनयम् ॥ भगवन् ! यदादिशसि, तत् करिष्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौशिकः ॥ शृण्वन्तु शृण्वन्तु विश्वे देवाः । यदादिशामि तत्करिष्यसि ?

राजा ॥ वाढं करोमि ।

कौशि ॥ यद्येवमस्मिन्नेवार्थिनि विक्रीयात्मानं प्रयच्छ मे दक्षिणा-सुवर्णानि ।

राजा ॥ सवैक्लव्यमात्मगतम् ॥ अहह ! का गतिरिदानीम् ॥ प्रकाशम् ॥ भगवन् ! यदादिशसि । चण्डालमुपगम्य भोः स्वजाति-महत्तर ! समयेन मां क्रेतुमर्हसि ।

चण्डालः ॥ अथ कीदिशे दे श...

राजा ॥ श्रूयतां ।

भैक्ष्याशी दूरतस्तिष्ठ... ध्याम्बर-परिच्छदः ।
यद्यदादिशति स्वामी तत् करोम्यविचारितम् ॥

॥ उभौ सपरितोषम् ॥ अले शुद्ठु एशे दे शमए गेह्न ए शुवर्खं इति दूरादर्पयति ।

राजा ॥ गृहीत्वा सहर्षम् ॥

अनृणस्य ममेदानीमशप्तस्य द्विजन्मना ।
अपरिभ्रष्ट-सत्यस्य श्लाघा चाण्डाल-दासता ॥

॥ कौशिकं प्रति सानुनयम् ॥ भगवन् ! प्रतिगृह्यतामिदमशेष-धनम्

कौशि ॥ सवैलक्ष्यम् ॥ दास्यसि : ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ सानुनयम् ॥ भगवन् ! गृह्यताम् ।

कौशि ॥ परिगृह्य स्वगतम् ॥ किमतःपरं निर्बन्धेन भवतु गच्छामि ॥ सवैलक्ष्यं तथा करोति ॥

राजा ॥ सविनयमञ्जलिं बध्वा ॥ भगवन् ! कालक्षेपकृतस्त्वपराधो मां प्रति मर्षणीयः ।

कौशिकः ॥ क्षान्तम् । इति निष्क्रान्तः ॥

राजा ॥ चण्डालमुपगम्य ॥ भोः स्वजातिमहत्तर ! इत्यर्द्धोक्ते मुखमावृणोति ॥ भोः स्वामिन् ! आज्ञापय किं मया दासेन कर्त्तव्यम् । ...मिव...

धर्म्मः ॥ सपरितोषमो...तम् ॥ ...पूर्व्वं न वा श्रुतपूर्व्वं कर्म्म । ...ायम् ॥ अले ! दक्खिण-मशाणं गदुअ मडअ-चीड़-हाड़केण भविअ* अहोलत्तं जग्गिदव्वं अहम्मि घ्रुघ्रभवणं जेव्व गच्छामि ॥

राजा ॥ यथाज्ञापयति स्वामी । इति निष्क्रान्ताः सर्व्वे ॥

॥ इति आर्य्यक्षेमीश्वरकृते चण्डकौशिक-नाटके तृतीयोऽङ्कः ॥

---

* मलअ-चील-हालकेण भविअ इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चण्डकौशिकम् ।

चतुर्थोऽङ्कः ।

। ततः प्रविशति चण्डालाभ्यामनुगम्यमानः
सचिन्तो राजा ।

चण्डालौ॥ ओशलध अज्जा! ओशलध ण होदू एशे वज्झे, ता कि एत्थ पेक्खध ! ॥ आकर्ण्य आकाशे ॥ [illegible] किं भणाध? के एशे, कहिं वा णीअदि? एशे [illegible] महट्टलशश शआशादो वङ्कट्टलशुवण्णगेह्णिअ दाशत्तणं पड़िवसे । त[illegible] लक्खणणिमित्त दरिखण-मशाणश्चं णीअदि । राजा निश्व[illegible] आत्मगतम्॥ कष्टम्! अनवधिरयं यथोत्तरदारुणो मे व्यस[illegible] परम्परापातः ॥

॥ तथाहि ॥

इदमद्य मम श्वपाक-दास्यं वसतिर्घोरतरं महाश्मशानम् ।
मृत-कम्बल-हारिता च कर्म्म परिणाम्त व्यसनेष्वहो न दैव[illegible]

॥ सशोकम् ॥ सुष्ठु खल्विदमुच्यते दुःखं दुखैस्तिरोधीयते इ[illegible] यतो दक्षिणात्रण्यनिवृत्तं मां इदानीं आशोको बाधते । वैक्ल[illegible] नाटयित्वा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं शोचामि मदेकबान्धवतया सम्प्रत्यनाथाः प्रजाः ?
किं बन्धूनतिवत्सलानशरणानेतांश्च भृत्यानहम् ?।
किं दासीं द्विजसद्मनि * प्रियतमां वत्सञ्च किं वा शिशुं ?
किं चण्डाल-भुजिष्यतामुपगतः पापो निजं जीवितम् ?॥ †

॥ स्मृतिमभिनीय सखेदम् ॥

दुराराध्ये तस्मिन् परमतपसां धामनि तदा
मुनौ विश्वामित्रे कथमपि यदानृण्यमभवत् ।
तदा क्षिप्तं ‡ दृष्ट्वा प्ररुदितमुखं बालतनयं
तदन्तःशल्यं मां [illegible]मिव विरूढं ग्लपयति ॥ ¶

चण्डालौ ॥ पुनस्तदेव पठतः ॥

राजा ॥ विचिन्त्य सखेदम् आत्मगतम् । अहह दृढं पीडयति मां सम्प्रति तत्, यत् तदा ।
स्मरयति गुरोर्भक्त्या तस्मिन् द्विजे च रुषारुणे §
रुदति च तदा क्षिप्ते बाले पटान्त-निरोधिनि ।

---

* द्विजसद्मनि ब्राह्मणस्यालये दासीं दासीभूतामित्यर्थः ।

† एकैका घटनैव मे शोचनीयेति भावः ।

‡ चरणप्रहारेण भूमौ पातितमित्यर्थः ।

¶ दुनोतीत्यर्थः ।

§ द्विजन्मनि रोषारुणे इत्यादर्श-पुस्तकस्य पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधृतविधृतै-र्बाष्पोत्पीडै-र्जड़ीकृत-तारकां *

कथमपि तया क्रूरे दृष्टि-श्चिरान्मयि संहृता ।।

।। सवैक्लव्यम् ।। हा देवि !

यदि तपनकुलोचिता वधूस्त्वं

यदि विमले शशिनः कुले प्रसूता ।

मयि विनिपतितासि भस्मराशौ

सुतनु ! घृताहुतिवत् तदा कथं त्वम् ? ।।

अपि च राजपुत्त्रि !

उपवन-नवमालिका-प्र[illegible]

स्रजमपि या परिखिद्यसे सृजन्ती ।

परिजन-वनितोचितानि † कर्मा-

ण्यपरिचितानि कथं विधास्यसि त्वम् ?।।

चण्डालौ ॥ अले ! णातिदूले दक्खिण-मशाणं ता तुलिअं

आअच्छ ।

राजा ॥ दृष्ट्वा सावष्टम्भम् ॥ अये ! कथमिदं महाश्मशानम् ।

विदूरादभ्यस्तैर्वियति वङ्कशो मण्डलशतै-

---

* विधृत-विधृतैः कष्टेण निरुद्धैः बाष्पोत्पीडैर्बाष्पोद्गमैः जड़ीकृते स्तम्भिते तारके कनीनिके यस्याः सा ।

† परिजन-वनितानां परिचारिकाणाम् उचितानि करणीयानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उदञ्चत्-पुच्छाग्र-स्तिमित-विततैः पक्षतिपुटैः । *
पतन्त्येते गृध्राः शव-पिशित-लोलाननगुहा-
गलल्लालाक्लेद-स्थगित-निजचञ्चूभयपुटाः ॥ †

॥ नेपथ्ये कलकलः ॥

राजा ॥ कर्णं दत्त्वा अवलोक्य च । अहो बीभत्सरौद्रता श्मशानस्य । तथाहि ।

इमा मूर्छन्त्यन्तःप्रतिरवभृतः कर्णकटवः ‡
शिवाः क्रूराक्रन्दैरशिव-पटहाडम्बर-रवाः ।
ज्वलन्त्येते ता[illegible]टित-टकरोटी-पुर-दरी-
लसन्मस्तिस्नाता स्तिमितजटिलाग्रा हुतभुजः ।

---

* वियति आकाशे विदूरात् दूरतरप्रदेशात् अभ्यस्तैर्विक्षिप्तैः परिचालितैरित्यर्थः । बहुशो मण्डलशतैः वारंवारं मण्डलाकारभ्रमणैः करणैः, उदञ्चत्सु उत्क्षिप्तेषु पुच्छाग्रेषु स्तिमितैर्निश्चलैरत एव विततैः प्रसारितैः पक्षतिपुटैः पक्षमूलयुगलकैरुपलक्षिताः ॥ "पक्षमूलं तु पक्षतिः" हला २।८४ ।

† शवानां मृतदेहानां पिशितानि मांसानि "पिशितं तरसं मांसम्" अम १४५ पृ । तेभ्यो लोलानि चञ्चलानि लोलुपानीत्यर्थः । आननान्येव गुहाः गह्वराणि "देवखात बिले गुहा गह्वरम्" अम ७६ पृ ॥ तेभ्यो लन्ती या लाला "सृणिका स्यन्दिनी लाला" अम १४६ पृ ॥ सैव क्लेदः, तेन स्थगितानि स्तम्भितानि चञ्चूभयपुटानि तुण्डयुगलाग्राणि येषां ते ॥ गलल्लालाक्लेदाः स्थगित-निजचञ्चूभयपुटाः ॥ अथवा, गलल्लालाक्लेदः स्थगित-निजचञ्चूभयपुटा इति पृथग्विधः पाठः ।

‡ कर्णपटव इति पाठान्तरम् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ अपतोऽवलोक्य सश्लाघम् ॥ अहो! बीभत्समपि स्पृहणीयमिदं वर्त्तते! भद्र! कुणप *! सर्व्वखगाह्विभिः प्रणयिभिश्च श्वापद-गणैर्यथेष्टमुपभुज्यमानो धन्यस्त्वमसि । तथाहि ।

भिनत्यक्ष्णोर्मुद्रां शिरसि चरणौ न्यस्य करटः †
शिवा सृक्कोपान्ते ग्रसति रसनाग्रं विलुठितम् ।
छिनत्ति श्वा मेढ्रं प्रथयति च गृध्रोऽत्र विवरं
यथेष्ट-व्यापारास्त्वयि कुणप! यच्छ्वापदगणाः ॥

अहो! निःसारता शरीराणाम्!

तन्मध्यं तदुरस्तदेव वदनं ते लोचने [illegible]
जातं सर्व्वममेध्य-शोणित-वसा-मांसास्थि-लालामयम् ।
भीरूणां भयदं, तपास्पदमिदं ‡ विद्याविनीतात्मनां,
तन्मूढैः क्रियते वृथा विषयिभिः चद्रोऽभिमानग्रहः ॥

चण्डालौ ॥ अपतोऽवलोक्य ॥ अले! पणवेम्ह एदं तुङ्ग-तलु-कुहल-वाशिणीं भअवदिं चण्डकच्चाइणिं ।

अपरः ॥ एवं कलेम्ह ॥ इति तथा कुरुतः ॥

णिम्महिअ-चण्ड-मत्तिए! महिश-महाशुल-भिणगत्तिए! ।

---

* "कुणपः शवमुच्यते" इति हला ३।७ ।

† करटः काकः । "काके तु करटारिष्ट" इति अम १२२९ ।

‡ तपास्थलमिदमिति पाठः संगच्छते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कच्चाइणि! गजचम्मवसिए! लक्खणु मं चण्डमुण्डहत्थिए!।।

राजा ।। सर्व्वतोऽवलोक्य सविस्मयम् ॥ अहो वीभत्सोपचार-प्रियत्वं कात्यायन्याः! तथाहि ।

जरन्निर्माल्याढ्या मृतमहिष-गो-कण्ठलुलिताः
प्रलम्बन्ते घण्टाः श्रवणकटु-टङ्कारपटवः ।
तरुस्तम्भे देव्याः क्षतरुधिर-पञ्चाङ्गुलितले
रटन्त्येते यस्मिन् प्रकृति-बलि-लोला बलिभुजः ।। *

॥ सप्रणाममञ्जलिं बद्ध्वा ॥

भगवति! चण्डि! प्रेते! प्रेतविमानप्रिये! † लसत्प्रेते!।
प्रेतास्थि-रौद्ररूपे! प्रेताशिनि! भैरवि! नमस्ते ।।

॥ नेपथ्ये कलकलः ॥

---

* जरद्भिर्जीर्णैर्निर्म्माल्यैः देवार्च्चनानन्तरमुत्सृष्टैः कुसुमैः आढ्याः, परि-शुष्क-कुसुममालालङ्कृता इत्यर्थः । मृतानां महिष-गवां कण्ठेभ्यो लुलिताः संगृहीताः । श्रवण-कटुः कर्कशो दुःश्राव्य इति यावत् । य-टङ्कारः ध्वनिस्तत्र पटवः श्रुतिकठोरविरावित्वय इत्यर्थः । घण्टाः प्रलम्बन्ते लम्बमानास्तिष्ठन्ति । पञ्च अङ्गुलीनां तलानि पञ्चाङ्गुलितलानि क्षतानि विहितानि रुधिरैः शोणितैः पञ्चाङ्गुलितलानि यस्मिन् तत्र । देव्याः चण्डकात्यायन्याः यस्मिन् तरुस्तम्भे आवास-वृक्ष-वेदिकायां प्रकृति-बलि-लोलाः प्रकृत्या स्वभावेन बलिषु पूजोप-करणेषु लोलाश्चञ्चला लोलुपा इत्यर्थः । एते बलिभुजः काकाः रटन्ति शब्दायन्ते ।

† भगवति! चण्डि! प्रेतप्रिये! विमानप्रिये! इति पाठान्तरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ आकर्ण्य ॥ अहो ! नानादिगन्त-पातिनां स्वनीड़-पर्य्युत्सुकानां दिवसावसान-शंसिनां संरावणं विहङ्गानाम् । ॥ प्रतीचीं दृष्ट्वा ॥ न कस्यचिन्नाम न दुरतिक्रमा दैवपरिपाटिः ।

अयमसौ गगनाङ्गण-दीपक-
स्तरल-कालभुजङ्ग-शिखामणिः ।
क्षण-विड़म्बित-वाड़व-विग्रहः
पतति वारिनिधौ विधुरो रविः ॥

॥ समन्तादवलोक्य सविस्मयम् ॥

सन्ध्याबध्यास्र-शोणं तनु-दहन-चिताङ्गा[illegible]मन्दार्कबिम्बं
तारानाराशिकीर्णं विशद-नर-करङ्कायमाणोज्ज्वलेन्दु । *
हृष्यन्नक्तञ्चरौघं घन-तिमिर-महाधूम-धूम्रानुकारं
जातं लीलाश्मशानं जगदखिलमहो काल-कापालिकस्य ॥

चण्डालौ ॥ दृष्ट्वा ॥ कथं,

अत्थं गच्छदि सूले वज्झट्ठाणं गदे जधा वज्झे ।
एसो तमसंघाडे चण्डालकुलं व ओदरइ ॥

---

* तारासारका नाराश्चीनि मनुष्यास्थीनि इव तैः कीर्णं व्याप्तम् ॥ विशदो निर्म्मलो यो नर-करङ्कः नराणां करङ्कः । "करङ्को मस्तकेटशस्य-नारिकेल-फलास्थनि" मेदि ५८ ह ॥ स इवाचरति यः स विशद-नर-करङ्कायमाणः । तादृश उज्ज्वलेन्दु-र्यत्र ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ सर्व्वतोऽवलोक्य सावष्टम्भम् ॥ अहो! अतिगम्भीरभीषणाः सम्प्रति वर्त्तन्ते श्मशानशाखिनः ।

तथाहि ।

आस्कन्धादुत्पतन्तः पृथु-कुहर-गृहद्वारि कूजन्त्युलूका *
धुन्वन्तः पक्षपालीः † प्रबल-किलकिला मूर्ध्नि गृध्राः पतन्ति ।
शाखाग्रालम्बि-शीर्य्यत्-कुणप-घन-वसा-गन्धमाघ्राय रौद्रं
क्रन्दन्तः स्फारयन्ति ‡ स्फुरदनलशिखाः फेरवः फेत्कृतानि ॥

एकः ॥ जनान्तिकम् ॥ अले! विविध-वेताल-शङ्कुले एशे दक्खिण-मशाणे । त[...] शिग्घं शिग्घं गच्छम्ह ।

अन्यः ॥ एवं कलेम्ह ।

उभौ ॥ प्रकाशम् ॥ अले! महट्टलअशश आणाए एदं मशाणं आहिण्डन्तेण अहो-रत्तं तुए अप्पमत्तेण चिट्ठिदव्वं ।

राजा ॥ सहर्षम् ॥ एवं, यदादिशति स्वामी ।

नेपथ्ये ॥ कलकलः ॥

---

* उलूकाः कौशिकाः "उलूकः कौशिकः प्रोक्तः" हला २ । ८१ । पृथु-कुहर-गृहद्वारि आस्कन्धात् स्कन्धपर्य्यन्तम् उत्पतन्तः उद्गच्छन्तः । कूजन्ति शब्दायन्ते ।

† पक्षपालीः पक्षतीः धुन्वन्तः कम्पयन्तः । गृध्रा इत्यस्य विशेषणमेतत् ।

‡ स्फारयन्ति प्रकटयन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चण्डालौ ॥ सभयम् ॥ हा मादिए! समुत्थिदे णिशा-कल-अले ता शिग्घं पलाअम्ह ॥ इति निष्क्रान्तौ ॥

राजा ॥ सावष्टम्भं परिक्रम्य दृष्ट्वा ॥ अहो! बीभत्सदर्शनाः कौणपनिकायाः!

तथाहि ।

जरत्कूपाकारै-र्नयनपरिवेषै-स्तनुशिरा-
करालोच्चै-र्घोणाः * कुटिलरदनाः क्रूरवदनाः ।
अमी नाड़ी-जङ्घा-द्रुम-कुहर-निम्नोदर-भुवो †
घन-स्नायु-छन्न-स्फुपुटपटलं ‡ बि[illegible]ति वपुः ॥

॥ सकौतुकमवलोक्य ॥ अहो! क्रीड़ा-कलह-कौशलं पिशाचानाम्!

तथाहि ।

पिबत्येकोऽन्यस्मात् घनरुधिरमाच्छिद्य चषकं
ज्वलज्जिह्वो वक्त्राद्गलितमपरो लेढ़ि पिबतः ।

---

* जीर्णकूपसदृशैः नयनपरिधिभिरुपलक्षिताः । तनुशिराभिः करालाः भीषणाकारा उच्चैर्घोणा दीर्घनासिका येषां ते । "नासिका नासा घ्राणं घोणा च" हला २।२६६ इ ।

† नाड़ीविशिष्ट-जङ्घा एव द्रुमाः तेषां कुहराणीव निम्नोदरभुवो येषां ते।

‡ घनस्नायुभिः निविड़शिराभिश्छन्नं परिहितं स्फुपुटपटलं निम्नोन्नतस्थानसमूहो यस्य तत् । घनस्नायुच्छन्नं स्फुपुटपटलमिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्त्यानान् * कश्चिद् भुवि निपतितान् शोणितकणान्
चणादुच्चै-र्ग्रीवो रसयति लसद्दीर्घरसनः ॥

॥ सकौतुकमवलोक्य सस्मितम् ॥ अहो नु खलु भोः ! परिहास इव दुर्विदग्धानां केलिरपि रसान्तरम् आलम्बते यातुधानानाम् ।

तथाहि ।

क्व रम्यः सम्भोगो मृदु-मधुर-चेष्टाङ्ग-सुभगः †
कटाचाः कान्योन्यं प्रलयविततोल्काद्युतिभृतः ।
क्व दंष्ट्रासङ्घट्ट-ज्वलित-दहन-चुम्बितविधि- ‡
र्घनाश्लेषः क्वायं प्रतिरसदुरःपञ्जररवः ॥

॥ सघृणमवलोक्य ॥ धिगतिबीभत्समेतत् ।

चिताग्नेराकृष्टं नलक-शिखर-प्रोतमसकृत् ¶
स्फुरद्भिर्निर्वार्य्य-प्रलयपवनैः फूत्कृतशतैः । §

---

* स्त्यानान् घनान् स्निग्धान् वा । "स्त्यानं स्निग्धे प्रतिध्वाने घनत्वालस्ययोरपि" मेदि ८। ९ ।

† मृदु-मधुर-चेष्टाङ्ग-ललित इति वा पाठः ।

‡ चुम्बनविधिरित्यपि पाठः ।

¶ नलकस्य नासाभूषणविशेषस्य शिखरे प्रोतं विद्धम् ।

§ फूत्कृतरवैरिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरो नारं प्रेतः कवलयति तृष्णावश-ललत्-
करालास्यः शुष्यद्वदनकुहरस्तूङ्गिरति च * ।।

।। स्मृतिमभिनीय । अलममीषां दर्शन-कुतूहलितया । तद् यावत् स्वास्यादेशमनुतिष्ठन् परितः श्मशानमेव पर्य्यटामि । परिक्रम्य दृष्टिमभिनीय ।। अहो गम्भीरता निशीथिन्याः !

तथाहि ।

मुष्टिग्राह्यं तिमिरमभितो निह्नुते दिग्विभागं †
पादन्यासः स्खलति विषमे निष्फला दृष्टिपाताः ।
धाराभिन्नाञ्जन-गिरि-सुहृल्लुप्त-वर्णान्तरत्वात्
लब्धाद्वैतः ‡ स्फुरति परितो नीलिमैवैकतानः ।।

भवतु, उच्चैस्तावद् व्याहरामि । कः कोऽत्र भोः ! ¶ श्रूयतां मम श्मशानाधिपतेः स्वामिनो व्याहारः ।

अकृत्वा मत्परिज्ञानम्, अदत्त्वा मृतकम्बलम् ।
प्रवर्त्तनीयाः केनापि न श्मशानोचिताः क्रियाः ।।

तदद्यप्रभृति,

---

* शुष्यत् दह्यमानं वदनकुहरं यस्य सः । तादृशः सन् उद्गिरति च ।

† निह्नुतो दिग्विभाग इति पाठान्तरम् ।

‡ लुब्धाद्वैत इति पाठान्तरम् ।

¶ अथ कोऽयमिति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतत् तथेति करणीयमिहाप्रसक्तौ -
राज्ञा-व्यतिक्रमसहः किल नास्ति भर्तुः ।
ब्रह्मेन्द्र-वायु-वरुणप्रतिमोऽपि यः स्यात्
तस्याप्ययं प्रतिभटोऽस्तु भुजो मदीयः ॥

कथं न कश्चिद् व्याहरति, भवतु अन्यतो व्याहरामि । परिक्रम्य ॥ कः कोऽत्र भोः ! ।

॥ नेपथ्ये ॥ अयमहं भोः !

राजा ॥ सावष्टम्भम् ॥ कथं प्रतिव्याहारः । भवतु शब्दानुसारेणोपगम्य निपुणमवधारयामि कोऽयमिति । परिक्रम्य नेपथ्याभिमुखमवलोक्य च सविस्मयम् । अये कोऽयम् ?

खट्वाङ्गधृग् भस्मकृताङ्गरागो *
नरास्थिभूषोज्ज्वल-रम्य-कान्तिः ।
कपालपाणि-र्नृकरङ्क-मौलि-
राभाति साक्षादिव भूतनाथः ॥

॥ ततः प्रविशति कापालिकवेषो धर्म्मः ॥

धर्म्मः ॥ अयमहं भोः !

अयाचितोपस्थितभैक्ष्य-वृत्ति-

---

* भस्मकृताङ्गहार इति पृथग्विधः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवृत्त-पञ्चेन्द्रिय-निस्तरङ्गः । *
व्यतीत्य संसार-महाश्मशानं
चरामि बीभत्समिदं श्मशानम् ॥

॥ विचिन्त्य ॥ स्थाने स खलु रुद्रो भगवान् महाव्रतं चचार। परः किलायं प्रकर्षः कामचारिणाम् । किन्तु

भैक्ष्याद्वैतं तपोऽद्वैतं क्रियाद्वैतञ्च † तत्परम् ।
सुलभं सर्वमेवैतद् आत्माद्वैतं तु दुर्लभम् ॥

॥ समन्तादवलोक्य साशङ्कम् आत्मगतम् ॥

मया ध्रियन्ते भुवनान्यमूनि
सत्यञ्च मां तत्सहितं बिभर्त्ति ।
परीक्षितुं सत्यमतोऽस्य राज्ञः
कृतो मया वेषपरिग्रहोऽयम् ॥

---

* अयाचितं न प्रार्थितम्, उपस्थितं अयत्नेनैवोपात्तं यद् भैक्ष्यं भिक्षा तदेव वृत्तिराजीवो यस्य "जीवनं वृत्तिराजीव इति हलायुधः ॥ निवृत्तानि अनुद्वेलानि संयतानीत्यर्थः । पञ्च इन्द्रियाणि दर्शन-श्रवण-घ्राण-रसना-त्वग् रूपाणि यस्य सः, अत एव निस्तरङ्गः विक्षोभ-विरहितः ।

† भैक्ष्य-द्वैतम् दिनान्ते सकृद् भिक्षाचरणम् । तपोऽद्वैतम् द्विधाशून्य-हृदयेन तपश्चरणम् । क्रियाद्वैतं मनसैकतानेन, अविचलित-हृदयेन वा कार्यानुष्ठानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ विचिन्त्य साश्चर्य्यमात्मगतम् ॥ आश्चर्य्यं दुःखपरम्परास्वशोच्य-मानस्य * राजर्षेर्हरिश्चन्द्रस्य चरितम् । अथवा प्रकृतिरियं महात्मनाम् । कुतः,

सुखं वा दुःखं वा किमिव हि जगत्यस्ति नियतं
विवेक-प्रध्वंसाद् † भवति सुखदुःख-व्यतिकरः ।
मनोवृत्तिः पुंसां जगति जयनी कापि महतां
यया दुःखं दुःखं सुखमपि सुखं वा न भवति ॥

भवतु तत्सकाशमेव गच्छामि ॥ परिक्रम्य दृष्ट्वा सश्लाघम् ॥ अये अय-मसौ महात्मा तदुपसर्पामि ।। तथा कृत्वा ॥ भो राजन्! सिद्धि-भाजनं भूयाः ।

राजा ॥ स्वागतं महाव्रतचारिणो नैष्ठिकस्य ?

कापालिकः ॥ भो राजन्! अर्थिनो वयं भवन्तमुपागताः ।

राजा ॥ लज्जां नाटयति ॥

कापालिकः ॥ अलं व्रीड़या, योगचक्षुषो हि वयं, विदित-वृत्तान्ता एव भवतः । तथाप्येवमवस्थस्यापि ते न नः समो-हितदाने दारिद्र्यम् ।

---

* अशोचमानस्येति वा पाठः ।

† विवेकभ्रंशादिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाहि पश्य ।

परेषामुपकाराय न कथञ्चिन्न साधवः ।
कुङ्कुमपि समासाद्य धिनोतीन्दुर्वनस्पतीन् ॥

तदवधत्तां पुनः ।*

राजा ॥ अवहितोऽस्मि ।

कापा ॥ वेताल-वज्र-गुटिकाञ्जन-पादलेप-
दैत्याङ्गनाविधि-रसायन-धातुवादाः ।†
तच्चिन्त्यतां करतलोपगता समैते
विघ्नैः पटैरिव यथा न तिरस्क्रियन्ते ॥

तदादिश्यतां विघ्नप्रत्यूह इति ।

---

* तदवधत्तां भवान् इति पाठान्तरम् ।

† एते सिद्धिविशेषाः । वेतालो हि प्रेताधिष्ठित-शवः । वेतालसिद्धौ सत्यां वेतालस्तु साधकस्यादेशेन दुःसाध्यमपि कार्य्यं साधयति । वज्रसिद्धौ, वज्रं साधकस्यानुमते स्थाने पतति । गुटिकासिद्धौ, साधको मुखमध्ये गुटिकाविशेष-प्रक्षेपेण मयूरः काकोटपरः प्राणी वा भवति । अञ्जनसिद्धौ, नयनयोरञ्जन-विशेष-लेपनेन भूमध्यस्थं गुप्तधनं कालत्रयस्य घटनां वा प्रत्यक्षवत् पश्यति । पाद-लेप-सिद्धौ, जले स्थल इव पाद-चारेण गन्तुं शक्नोति । दैत्याङ्गना-विधि-सिद्धौ, दैत्याङ्गना साधकमाकाशमार्गेण स्थानान्तरं नयति, यथादेशमभीष्टं साधयति च । रसायन-सिद्धौ, साधकः द्रव्यसंयोगेन द्रव्यान्तरमुत्पादयितुं शक्नोति । धातुवाद-सिद्धौ, साधकः सुलभ-द्रव्येण दुर्लभं सुवर्ण-रौप्यादिकं स्रष्टुं प्रभवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ भोः साधक! योगबलाज्ज्ञानात्येव भवान्, यस्याधीनमिदं शरीरकं, तत् स्वाम्यर्थाविरोधतः प्रयतिष्ये।

कापा ॥ भो राजन्! कुतोऽत्र स्वाम्यर्थविरोधः। नन्वाज्ञामात्रसम्पाद्यं नः समीहितं भवतः *। तदितो नातिदूरे सिद्धरसानां महानिधानमस्ति † तदर्थमस्माभिरारम्भणीयमस्ति। भवता पुनरिहस्थेनैव विघ्नप्रत्यूहं प्रति सावधानेन भवितव्यम् ॥ इति निष्क्रान्तः ॥

राजा ॥ सावष्टम्भं सर्वतः परिक्रम्य ॥ प्रोत्सरत प्रोत्सरत विघ्नाः! सर्वथा प्रतिहतो वः प्रचार इति।

॥ नेपथ्ये ॥ राजन्! यथाज्ञापयसि।

श्रेयांसि विदृतद्वाराण्यद्य विद्याः स्वयंवराः।
सिद्धयः कामचारिण्यस्त्वदाज्ञां कोऽतिवर्त्तते ॥

राजा ॥ सहर्षम् ॥ दिष्ट्या तथेति प्रतिपन्नमस्मद्वचनं विघ्नैः। प्रियं नः प्रियम्।

॥ ततः प्रविशन्ति विमानचारिण्यो विद्याः ॥

॥ सहसोपसृत्य ॥ राजन्! हरिश्चन्द्र! दिष्ट्या वर्द्धसे।
त्वय्यचेष्टत राजन्ये क्रुद्धो यद् दारुणो मुनिः।

---

* नन्वाज्ञामात्रं करणीयं समीहितं नो भवतात इति इत्यपि पाठः।

† सिद्धरससन्निधानमस्ति तद्यदास्माभिरिति पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यास्त्वद्विपदां मूलं ता वयं समुपस्थिताः ॥

राजा ॥ दृष्ट्वा साश्चर्यमात्मगतम् ॥ कथमिमास्ता भगवत्यो विद्याः! यासु भगवतो विश्वामित्रस्यापि तीव्रैस्तपोभिरवसन्नम् ॥ प्रकाशम् अञ्जलिं बद्धा ॥ नमस्त्रिलोक-विजयिनीभ्यो विद्याभ्यः ।

विद्याः ॥ राजन्! त्वदायत्ता वयम्, अतस्त्वं शाधि नः ।

राजा ॥ यदि मामनुग्राह्यं भवत्योऽनुमन्यन्ते, ततो भगवन्तं कौशिकमुपतिष्ठध्वं ततोऽनपराद्धं मुनेरात्मानं समर्थयामि ।

विद्याः ॥ सविस्मयं परस्परमवलोक्य ॥ राजन्! एवमस्तु ॥

॥ इति निष्क्रान्ताः ॥

॥ ततः प्रविशति स्कन्धारोपित-निधानेन वेतालेनानुगम्यमानः कापालिकः ॥

कापालिकः ॥ सहर्षमुपसृत्य ॥ राजन्! दिष्ट्या वर्द्धसे, संसिद्ध-रसस्यास्य महानिधानस्य लाभाभ्युदयेन, तदुपयुज्यतां भगवान् रसेन्द्रः ।

यस्योपयोगादवधूय मृत्यु-
मासाद्य सद्योऽमरलोकमार्गम् ।
विरूढकल्पद्रुममञ्जरीणि *
शिरांसि मेरोर्विहरन्ति सिद्धाः ॥

---

* व्यारूढ़-कल्पद्रुममञ्जरीणि इति पुस्तकान्तरस्य पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ ननु दासभाव-विरुद्धमेतत्, एवं किल वञ्चितः स्वामी स्यात् ।

कापा ॥ साश्चर्यमात्मगतम् ॥ अहो आश्चर्य्यम्! भवत्वेवं तावत् । ॥ प्रकाशम् ॥ यद्येवं गृह्यतां सकलत्रस्यात्मनो निष्क्रियायैतन्महानिधानम् ।

राजा ॥ कथमेवं भविष्यति, यतोऽधनं दासभावं मन्यन्ते । स्वाम्यर्थतस्तु नेदं प्रत्याख्यानमर्हति इत्यनुमत एवायं भवतः सङ्कल्पः, तत्प्राप्यतां स्वामिनो निष्क्रतमिदं महानिधानम् ।

कापा ॥ साश्चर्यमात्मगतम् ॥ अहो धैर्य्यम्! अहो दानम्! अहो महानुभावता च!! अथवा,

चलन्ति गिरयः कामं युगान्त-पवनाहताः ।
कृच्छ्रेऽपि न चलत्येव धीराणां निश्चलं मनः ।।

तन्ममापि किमतिनिर्बन्धेन ॥ प्रकाशं वेतालं प्रति ॥ भद्र! गम्यताम्, क्रियतामस्य राज्ञः समीहितम् ।

वेतालः ॥ सप्रणामम् ॥ जं साधओ आणवेदि ॥ इति निष्क्रान्तः ॥

कापा ॥ समन्तादवलोक्य ॥ भो राजन्! प्रभातप्राया वर्त्तते विभावरी । तत् साधयिष्यामस्तावत् ।

राजा ॥ भोः साधक! स्मर्त्तव्या वयं दुःस्थितकथासु ।

कापा ॥ राजन्! देवतास्त्वां स्मरिष्यन्ति ॥ इति निष्क्रान्तः ॥

॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ प्राचीमवलोक्य सप्रसादम् ॥ अये कथम् !

तमो विभिद्य * गहनं सन्ध्यारुण-पुरःसरः ।

अनुग्रहाय लोकानाम् उदेत्ययमहर्पतिः ॥

तद् यावदहमपि भगवती-भागीरथीतीरमुपगम्य स्वाम्यादेश-समुतिष्टामि ॥ इति निष्क्रान्तः ॥

इति आर्य्यक्षेमीश्वर-कृते चण्डकौशिकनाटके श्मशानचरितं नाम चतुर्थोऽङ्कः ।

---

* निर्भिद्य इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चण्डकौशिकम् ।

पञ्चमोऽङ्कः ।

॥ ततः प्रविशति विक्षतमलिनवेषो राजा ॥

राजा ॥ सनिर्वेदं निश्वस्य ॥ कष्टं भोः कष्टम् !

यद्वैरं मुनिसत्तमस्य, सुहृदां त्यागस्तथा विक्रयो-
दाराणां तनयस्य, चेदमपरं चाण्डाल-दास्यञ्च यत् ।
दुर्वाराणि मया कठोरहृदयेनाप्तानि मूढात्मना
यस्यैतानि फलानि दुष्कृतमहो किन्नाम तद्दारुणम् ! ॥

॥ सवैलक्ष्यम् ॥ अहो ! बलवती भवितव्यता । कुतः,

मामानम्रशिरोधरं प्रभवता क्रुद्धेन राज्यश्रिया
यद्विश्लेषयतापि तेन मुनिना निःशोषितं नस्त्रयम् ।
तत्रापि व्यसनप्रियेण विधिना दत्तं तथा निष्ठुरं
येनात्मा तनयः कलत्रमपि मे सर्व्वं विलुप्तं क्षणात् ॥

॥ चिन्तां नाटयित्वा दीर्घञ्च निश्वस्य सवैलक्ष्यम् ॥ अहह !

शोचन्ती रजनीषु दैन्यविधुरा नूनं कृशाङ्गी मया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुमंवि मं मन्दभाइणीं परिच्चअसि ॥ इति मोहं नाटयति ॥

राजा ॥ श्रुत्वावलोक्य च सवैक्लव्यम् ॥ कथमियमपि तपस्विनी भर्त्त्रा परित्यक्ता ! सर्व्वथा सर्व्वत्र निष्करुणता हतविधेः ! ।

शैव्या ॥ ससम्भ्रममुत्थाय ॥ किं खु एदं वट्टदि, कहिं गदो मे पुत्तओ ॥ दृष्ट्वा परिष्वज्य ॥ पुत्तअ ! किंत्ति मं णालवसि ? एआइणी भाआमि क्खु अहं, किं ण पेक्खसि एदं भीसणं महामसाणं ? ॥ सोन्मादम् ॥ किं भणसि ? उअज्झाअस्स कालणादो कुसुमाइं अवचिणन्तो कोड़रादो णिक्कमिअ कह्लाहिणा दट्ठम्हि ? ॥ ससम्भ्रमम् ॥ कहिं कहिं सो कह्लाहि, किं त्ति मं ण दंसेदि ॥ समन्तादवलोक्य ॥ अलिअं अलिअं, कुदो एत्थ कह्लाहि ॥ उपविश्य सकरुणम् ॥ हा जाद ! उट्ठेहि, उवणेहि दाव उअज्झाअस्स अखंडिदाइं मालूर-वत्ताइं, तिलछेत्त-सम्भवाइं दब्भंकुराइं, अदिक्कामदि से होमवेला, पड़िणिउत्ता दाणिं सव्वे वह्मआरिणो हुविस्सन्ति ॥ उत्थापयितुमिच्छन्ती सावेगम् ॥ कधं सच्चकं जेव्व मं मन्दभाइणीं समुज्झिअ दूरं गदोसि ! हा हदह्मि मन्दभाइणी ! ॥ इति मूर्च्छां नाटयति ॥

राजा ॥ सवैक्लव्यम् ॥ कष्टमकरुणस्यापि तस्य विधेरमी सुदुःश्रवा व्यवहाराः । *

* दुःश्रवा व्याहारा इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैव्या ॥ संज्ञां लब्ध्वा सोपालम्भम् ॥ हा अज्जउत्त ! पेक्ख दाणिं अङ्कदुल्ललिदस्स * संपदं अवत्थन्तरं ! सव्वधा णिक्किव ! कहिं दाणिं विसत्थहिअओ चिट्ठसि ! असां च तुए अहं समादिट्ठा जं पअत्तेण पालणीओ एसो दे वालओ, तं च मए पाव-सीलाए तधा ण पड़िवसां ।

राजा ॥ सविशेषकरुणम् ॥ अहो ! मर्म्मस्पृशि परिदेवितानि !

शैव्या ॥ सस्पर्शं सुतस्य प्रत्यङ्गमालोक्य ॥ हा पुत्तअ ! एदं खु दे मुद्ध-मिअङ्क-भासुर-णिडालवट्टं, इमे सुसिणिद्ध-पह्मले पज्जन्त-पाटले सिणिद्ध-धवले लोअणे, अअञ्च सुहड़िदट्ठिवन्धो कठिण-वित्थिसा-वक्खत्थलो ; ता किं एत्थ सरीरे अलक्खणं संदिट्टं कअ-न्तहदएण ? तधा सच्चसन्धस्स अज्जउत्तस्स मम मन्दभाइणीए चरिदे पमादो। सव्वधा अआरणो धम्मो, अप्पमाणं च लक्खणं, अलिअ-वादिणो विसाण-दूत्तआ ; जदो वङ्कसो दिट्ठ-पच्च-एहिं समादिट्ठम्मि सामुद्द-लक्खणेहिं, जधा वंस-वज्भणो दीहाउ चक्कवत्ती एसो पुत्तओ दे भविस्सदि त्ति । ता मम मन्दभाइणीए भाअधेएहिं सव्वं अलिअं संवुत्तं।

राजा ॥ साशङ्कम् ॥ कथं संवादिनी कथा वर्त्तते ॥ निपुण-मवलोक्य सास्त्रम् ॥ अये कथम् !

---

* अङ्कदुल्लहस्स पुत्तअस्स इति पुस्तकान्तरस्य पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छत्राकारमिदं शिरः पृथुललाटान्तं विशालेक्षणं,
चक्राङ्कौ चरणौ, करौ सकमलावाजानुलम्बौ भुजौ ।
क्षामं मध्यमुरो विशालमुदरं तुच्छं कटिः पीवरा
नूनं भूपकुलाङ्कुरः शिशुरयं साम्राज्यचिह्नाङ्कितः ॥

॥ स्मृतिमभिनीय सवैक्लव्यम् ॥ मे रोहिताश्वो नूनमस्यामेव वयोऽवस्थायां * वर्त्तते, तदभिशङ्कते मे हृदयम् । अथवा प्रतिहतममङ्गलं वत्सस्य ।

शैव्या ॥ सोपालम्भमाकाशे ॥ अज्जवं कोसिअ ! किदत्थो दाणिं सि ।

राजा ॥ सावेगम् ॥ कथं भगवन्तं कौशिकमुपालभते ! सर्वथा न किञ्चित् विसंवदति † ! तदलं परपरिग्रह-शङ्कया शैव्यैवेयम् ‡ ॥ चिरमवलोक्य सकरुणम् ॥ कृतमद्यापि सन्देहेन । कुतः,

सा वाणी करुणार्त्तनाद-विकलाप्यामन्द्र-तन्त्री-स्वना
ते चामी भ्रमरौघ-नील-कुटिलाः पर्य्याकुला मूर्द्धजाः ।
तान्यङ्गानि कृशान्यमूनि सहसा दुःप्रत्यभिज्ञानि मे

---

* कष्टमियता कालेन वत्सो मे रोहिताश्वो नूनमस्य वयोऽवस्थायाम् इति वा पाठः ।

† सर्व्वथा न किञ्चिन्न विसंवदति इति पाठान्तरम् ।

‡ शैव्येयमिति पुस्तकान्तरस्य पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कान्तिः सैव पुराण-चित्र-मलिना लेखाभिरुन्नीयते ॥ *

हा वत्स रोहिताश्व ! क्वासि, मे देहि प्रतिवचनम् ॥ इति मूर्च्छितः पतति ॥ सञ्ज्ञां लब्ध्वा रोहिताश्वस्य मुखमवलोक्य ॥ अनुद्भिद्यमान-दशनाङ्कुरस्य स्मरामि शैशवं मन्दभाग्यः !

प्रथित-मङ्गल-गुग्गुलु-कल्पित-
प्रतनु-लोल-जटावलि-मण्डितम् । †
मधुप-लङ्घित-मुग्ध-सरोरुह-
द्युति मुखं तदिदं न विराजते ॥

हा वत्स रोहिताश्व ! हा तपनकुल-बाल-प्रवाल ! हा हरिश्चन्द्र-हृदयानन्दन ! हा कुपित-कौशिक-दक्षिणा-ऽऽहरण-प्रधान-पण्य !

---

* रेखाभिरुन्मीयते इत्यपरः पाठः ।

† प्रथितो विख्यातो यो मङ्गलो माङ्गल्यः गुग्गुलुः कौशिकनामा सुगन्धि-द्रव्यविशेषः । तेन कल्पिता या प्रतनु-लोला जटावलिः तया मण्डितं भूषितम् । "कौशिको गुग्गुलुः पुरः" अम, ८५ इ ॥ गुग्गुलुर्हि मरुभूमौ जायते, तथा-चोक्तं प्रयोगामृते "जायन्ते पुर-पादपा मरुभुवि ग्रीष्मेऽर्क-सन्तापिताः शीतार्त्ताः शिशिरेऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा । हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं भृङ्गाभं कुमुदद्युतिश्च विधिना ग्राह्या परीक्षा ततः ॥ वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति क्लिश्यन्ति कोष्णसलिले पयसः समानाः ।" इत्यादि ॥ प्रथित-मङ्गल-गुग्गुलु-कल्पितं प्रतनु-लोल-जटावलि मण्डितम् इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेष्टं न दत्तं न कुलोचितानि
सुखान्यवाप्तानि यशो न कीर्णम् ।
न्यग्रोध-वीजाङ्कुरमूषरस्थं
विडम्बयन् वत्स ! दिवं गतोऽसि ! ॥

अपिच । वत्स !

मूर्द्धा-ऽभिषेक-पयसा न पवित्रितस्ते !
दानैः करौ, न चरणावरि-मौलि-पातैः ! ।
जातौ धनुर्गुणकिणाङ्कधरौ न बाहू !
लब्धोदयः प्रतिपदिन्दुरिवासि नष्टः ! ॥

॥ विचिन्त्य ॥ तत् किमिहोपसृत्य * विलपन्त्या देव्याः कथयाम्यात्मानम् ? अथवा न युक्तमिमां तनय-शोक-दह्यमानां तपस्विनीं स्वदशा-विपर्य्ययेणापरेणोद्वर्त्तयितुम् † ॥ आत्मानमवलोक्य ॥ दुरात्मन् ! हरिश्चन्द्रहतक ! कथमद्यापि न म्रियसे ? किमतःपरं द्रक्ष्यसि ? ॥ इति मूर्च्छां नाटयति शनैरुन्मील्य ॥ दुरात्मन् ! हरिश्चन्द्रहतक ! यदेतान् इदानीमपि हतप्राणान् न परित्यजसि, तत् किमात्मघातिनो लोकादात्मानं परित्रातुमिच्छसि ? धिङ्मूर्ख !

---

* तव् कथमिहोपसृत्य इति पाठान्तरम् ।

† स्वदशाविपर्य्ययारोपेणोद्वेदयितुम् इत्यन्यविधः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरमद्यैव निर्म्मज्जन् अन्धेतमसि दारुणे ।
पुत्राननेन्दु-रहिता न पुनर्वीक्षिता दिशः ॥ *

अपिच

अन्धं तमः क्रकच-भैरव-पूय-वीची-
चण्डासिपत्रवन-रौरव-शाल्मलीषु ।
नैतेषु सन्ति नरकेष्वपि यातनास्ता
दुःखेन यास्तनय-विक्लवजेन तुल्याः ॥

तदलं विलम्बेन । भवतु, भागीरथी-तटोपान्तेषु सुतशोकाग्नि-दह्यमानमात्मानं निर्वापयामि ॥ इति मन्दं परिक्रम्य स्मृतिमभिनीय ससम्भ्रमम् ॥ अहह ! मनाक् पराधीनमात्मानं विस्मृतोऽस्मि ! । †
विचिन्त्य सवैक्लव्यम् ॥ कष्टं भोः कष्टम् !

मरणान् निर्वृतिं यान्ति धन्याः स्वाधीनवृत्तयः ।
आत्म-विक्रयिणः पापाः प्राणत्यागेऽप्यनीश्वराः ॥

॥ वैक्लव्यं नाटयित्वा ॥ तदस्मादपि मनोरथाद् भ्रष्टोऽस्मि मन्द-भाग्यः ! कुतः

दारुणस्यास्य दुःखस्य धैर्य्यमस्त्येव भेषजम् ।

---

* निर्म्मज्जन् इत्यत्र निर्म्मग्नम्, दिश इत्यत्र दश इत्यन्यविधः पाठः ।

† सुतशोकाग्नि-दह्यमानम् इत्यत्र शोकाग्नि-दह्यमानम्, विस्मृतोऽस्मि इत्यत्र विस्मृतोऽसि इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

दुर्वार-विनिपातोऽयं भर्तुराज्ञा-व्यतिक्रमः * ॥

॥ सावष्टम्भम् ॥ तद् यावदिदानीम् असह्य-शोकाग्नि-दह्यमान-मात्मानं विवेकवारिणा संस्तभ्य भर्तुराज्ञां प्रमाणीकरोमि । यतः ।

मध्ये व्यक्तमनादि-विभ्रमवशादव्यक्तमाद्यन्तयोः
पञ्चत्वं प्रकृतिः किलास्य जगतस्तत् पञ्चधा सम्भृतम् ।
संसारार्णव-वीचि-भङ्ग-वलनैर्योगा † वियोगैः समा-
स्तन्मोहादपरं म वेद्मि विदुषां शोकस्य यत् कारणम् ।

शैव्या ॥ संज्ञां लब्ध्वा ॥ कधं एदं हदजीविदं ण मं परिच्चअदि, ता किं णु क्खु एत्थ करणिज्जं ॥ अश्रूणि परिम्लज्य ॥ भोदु एदस्सिं मसाण-पादवे अत्ताणअं उव्वन्धिअ वावादइस्सं । इति पाशं रचयति ।

राजा ॥ दृष्ट्वा ससम्भ्रमम् ॥ अहह ! इदमपरमापतितं जीवित-व्यसन-फलम् । तत्किं करोमि मन्दभाग्यः ! ॥ विचिन्त्य ॥ भवत्वेवं तावत् ॥ इति अन्यतो गत्वा ॥ मरणान्निर्वृति यान्ति इत्यादि पठति ॥

---

* दुर्वारोऽपरिहार्यः विनिपातः अधोगतिर्यस्मात् सः । प्रभोरादेशस्य लङ्घनात् निरयोऽवश्यम्भावीत्यर्थः ।

† संसारार्णव वीचिभङ्ग-वलयैरिति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वकर्म्म-वैचित्र्य-विपाक-विभ्रमै-
र्विरूढ़-मार्गाः परलोक-भूमयः ।
विहाय मायामवशस्य भूरियं
विहृस्यते सा किल पारलौकिकैः ॥

शैव्या ॥ आकर्ण्य ससम्भ्रमं पाशमुत्सृज्य ॥ हद्धि हद्धि ! मरण-मह्सवासत्त-हिअआए पराधीण-जीविदाए दासत्तणं वि मए विसुमरिदं । असंस्सिं वि जम्मन्तरे इमादो दासभावादो ण विमुक्ता भविस्सं ॥ ऊर्द्ध्वमवलोक्य दीर्घं निश्वस्य ॥ भअवं देव्व ! मरिदुं वि ण लब्भदि भअवदो सआसादो । ता हदह्मि मन्दभाइणी ! ॥ इति आत्मानं पातयित्वा सहसोत्थाय अश्रूणि प्रमृज्य ॥ किंत्तिअं दाणिं अप्पदीआर-दालुणे दसा-विसंवादे परिदेविदव्वं, ता कालोचिदं कदुअ दासित्तण-समुचिदाए सुस्सूसाए दिअवरं आराधअन्ती व्वदोववास-णिअमेहिं अत्ताणअं परिसोसइस्सं । जधा ण इमस्सिं मणुस्स-लोए पुणो वि सम्भविस्सं मन्दभाइणी ॥ इति चितां रचयति ॥

राजा ॥ दृष्ट्वा सकरुणम् ॥ अये ! आरब्धमनया कालोचितम् ॥ आत्मगतम् ॥ साधु देवि ! साधु ! नास्यामप्यवस्थायाम् * अतिक्रान्तमाभिजात्यम् ! तदहमिदानीमुपसृत्य भर्त्तुराज्ञां प्रमाणी

* मास्यामवस्थायाम् इति पाठान्तरम् ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोमि ॥ तथा कृत्वा सवैलक्ष्यं सवैलक्ष्यं च ॥ देवि ! ॥ इत्यर्द्धोक्ते मुखमाच्छादयति ॥ महाभागे !

अकृत्वा मत्परिज्ञानम्, अदत्त्वा मृतकम्बलम् ।
प्रवर्त्तनीयाः केनापि न श्मशानोचिताः क्रियाः ॥

तदुपनीयतां मे मृत-कम्बलः ॥ इति सचाम्पलम्भं करं प्रसारयति ॥

शैव्या । भयं नाटयन्ती ॥ भद्दमुह ! दूरदो चिट्ठ । अहं दे उवणइस्सं ।

राजा । व्रीड़ां नाटयित्वा ॥ स्थितः । *

शैव्या ॥ रोहिताश्वस्य शरीरात् पटमाक्रष्य अर्पयन्ती, हस्तं समालोक्य सविस्मयमात्मगतम् ॥ कधं चक्कवत्ति-लक्खण-सणाहो वि अअं पाणी इमस्स वावारस्स उवणीदो ॥ अपहृत्य शनैः प्रत्यङ्गमवलोक्य सप्रत्यभिज्ञानम् ॥ कधं अज्जउत्तो ! ॥ ससम्भ्रमम् ॥ हा अज्जउत्त ! परित्ताहि परित्ताहि ॥ इति आत्मानं पातयति ॥

राजा ॥ अपहृत्य ॥ देवि ! न मां श्वपाक-दास्य-दूषितं स्प्रष्टुमर्हसि । तत् समाश्वसिहि समाश्वसिहि ।

शैव्या ॥ समाश्वस्य ॥ हद्दी हद्दी किणेदं ।

राजा ॥ कर्म्मणां विपाकः । तदलं परिदेवितेन † उपनीयतामेतत् ।

---

* राजा ॥ व्रीड़ां नाटयति इत्यपि पाठः ।
† तदलं परिदेवितैरिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैव्या ॥ सवैक्लव्यमर्पयति ॥ आकाशात् पुष्पवृष्टिः ॥ उभौ सविस्मय-मवलोकयतः ।

राजा ॥ कथमाकाशात् पुष्पवृष्टिः !

॥ नेपथ्ये ॥

अहो दानमहो शीलम्, अहो धैर्य्यमहो क्षमा ।
अहो सत्यमहो ज्ञानं हरिश्चन्द्रस्य धीमतः ! ! ॥

शैव्या ॥ श्रुत्वा सश्लाघम् ॥ अम्मो * को दाणिं अज्जउत्तस्स गुणसलाहाए मे हिअअं आसासेदि †। अहवा, अलं गुण-कधाए अज्जउत्तो वि णाम इमं अवत्यन्तरं अनुभोदि ‡। सव्वधा अआरणो धम्मो, अरक्खिदिदं सव्वं अन्धआर-नच्चिदं सव्वं विणाणं ।

॥ ततः प्रविशति धर्म्मः ॥

धर्मः ॥ महापतिव्रते ! महाराज हरिश्चन्द्र ! कथमहमकारणो नाम ¶। तथाहि · पश्य,

अन्येषां ये दुर्लभाः पार्थिवानां
सत्यैर्दानैरूर्ज्जितैः कर्म्मभिश्च ॥

---

* अम्हो इत्यपि पाठः ।

† हिअअं मे समास्सासेदि इति वा पाठः ।

‡ अज्जउत्तो वि नाम इमं अवत्थन्तरं अणुभवदि त्ति इति पाठा न्तरम् ।

¶ कथमहमकारणं नाम इत्यपि पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तानेवाहं ब्रह्म-सालोक्य-पूतान् *
आप्तो दातुं शाश्वतानद्य लोकान् ॥

तदलं विषादेन । वत्स रोहिताश्व ! समाश्वसिहि समाश्वसिहि ।

राजा ॥ दृष्ट्वा सहर्षम् ॥ कथं स भगवान् धर्म्मः । भगवन् ! अभिवादये । †

शैव्या ॥ भअवं ! पणमामि ।

रोहिताश्वः ॥ शनैः शनैरुन्मीलयति ।

धर्म्मः ।

समाश्वसिहि वत्स ! त्वं, पिता धर्म्मेण पालितः ।
गत-प्रत्यागतैः प्राणैश्चिरं पालयितुं प्रजाः ॥ ‡

रोहिताश्वः ॥ समुत्थाय ॥ कथमम्बा ! तत केन पुनरिमं प्रदेशमानीतासि ? । ¶

शैव्या ॥ जाद ! अत्तणो भाअधेएहिं ।

धर्म्मः ॥ वत्स ! अयं ब्रह्मलोकातिथिः प्रियः पुत्र एव ।

---

* ब्रह्मलोकस्य पूतान् इति पुस्तकान्तरस्य पाठः ।

† प्रणमामि इति अन्यविधः पाठः ।

‡ चिरं पालयत प्रजा इति पाठान्तरम् ।

¶ कथमम्बा ! केन पुनरिमं देशमानीतासि इति वा पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोहिताश्वः ॥ तात! परित्रायस्व परित्रायस्व ॥ इत्यात्मानं पातयति ।

राजा ॥ उपसृत्य ॥ वत्स! न मां श्वपाक-दास्य-दूषितं * स्प्रष्टुमर्हसि ।

धर्म्मः ॥ राजन्! अलमिदानीं कृपणैरालापैः † । तथाहि,

क्रेता योऽस्या ब्राह्मणस्ते सदारो
यश्चाण्डालो यत्र राज्यञ्च तत् ते ।
राजन्! गुह्यं तत्वतो ज्ञातुमेतद्
दिव्यं चक्षुः साम्प्रतं ते ददामि ॥

कः कोऽत्र परीवाराणाम्? ‡

प्रविश्य पुरुषः ॥ आज्ञापयतु भगवान् । §

धर्म्मः ॥ इतो भव ।

पुरुषः ॥ एषोऽस्मि ।

धर्म्मः ॥ महाराज! विमानमधिरुह्य दिव्येन चक्षुषा विलोक्यतां यथेदं सर्वमिति ।

---

* श्वपाकदूषितमिति पाठान्तरम् ।

† कृपणालापैरित्यपि पाठः ।

‡ कः कोऽत्र परिचारकाणाम्, विमानम् इति अपरपुस्तकस्य पाठः ।

§ आज्ञापयतु धर्म्मो भगवान् इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राजा ॥ यथादिशति भगवान् ॥ इति दिव्यं विमानमारुह्य ध्यानं नाटयन् ॥ धिक् प्रमादः ! धिक् प्रमादः ! विद्योपस्थान-परितोषितेन भगवता कौशिकेन सचिवेषु नो राज्यं प्रतिमुक्तम् ! ।

धर्म्मः ॥ राजन् ! भवत्-सत्य-जिज्ञासयैवासौ मुनिस्तथा कृतवान्, नतु राज्यार्थितया, तदलं सम्भ्रमेण, विशुद्धमालोक्यतां * तदिदं सर्व्वम् ।

राजा ॥ पुनर्ध्यानं नाटयित्वा सानन्दम् † ॥ देवि ! दिष्ट्या वर्द्धसे,

क्रेता स ते प्रकृति-कारुणिको द्विजन्मा
जाया-सखो ननु शिवौ किल दम्पती तौ ।
क्रेता ममापि खलु यो भगवान् स धर्म्म-
स्तेनाधुना मनसि शल्यमुपैति शान्तिम् ॥ ‡

धर्म्मः ॥ तेन हि अभिषिच्यतां पृथिवी-राज्ये वत्सो रोहिताश्वः ।

राजा । भगवन् ! यदादिशसि ।

धर्म्मः ॥ आसनम् आसनम्, छत्रं छत्रम् चामरं चामरम्, भृङ्गारः भृङ्गारः ।

---

* विस्रब्धमालोक्यतामिति पाठान्तरम् ।

† सस्मितमिति पाठान्तरम् ।

‡ धर्म्माधुना मम विशल्यमुपैति शान्तिमित्यपरः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुषः ॥

एतत् सिंहासनमुपनतं दीप्तमाणिक्य-चित्रं
छत्रञ्चैतत् परिणत-शरच्चन्द्रबिम्बानुकारि ।
एते ज्योत्स्ना-प्रसर-धवले चामरे हेमदण्डे
भृङ्गाराम्भस्तदिदमभितः सम्भृतं सागरेभ्यः ॥

॥ धर्म्महरिश्चन्द्रौ रोहिताश्वस्याभिषेकं नाटयतः ॥

धर्म्मः ॥ ऊर्द्ध्वमवलोक्य ॥ दिष्ट्या विमान-चारिणीभिर्दैवताभिरभिनन्द्यते वत्स-रोहिताश्वस्याभिषेक-महोत्सवः ।

तथाहि ।

एता नद्यो दधति कलशान् संभृतांस्तीर्थतोयैः
सान्द्रः स्निग्धः स्थगयति दिशो दुन्दुभीनां निनादः ।
नृत्यन्त्येताः सुर-युवतयो मुक्तमन्दारवर्षाः *
स्वैः स्वैरंशैर्नरपतिममी लोकपाला भजन्ते ॥

तत् कृतं करणीयमिदानीं ब्रह्मलोकमभिप्रतिष्ठस्व । †

राजा ॥ भगवन् !

क्व तव ... -तत्परे खलु गतान् दृष्टाधरे कौशिके

* मुक्तमन्दार-वर्षैरिति पाठान्तरम् ।
† तत् कृतमिदानीं यत् करणीयम् । इदानीं ब्रह्मलोकमभिप्रतिष्ठस्व इति पृथग्विभक्तः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाथैतान् क्व विहाय गच्छसि नयास्मानप्यनाथानिति ।
प्रत्यग्रागतबाष्प-दीनवदनैरुक्तोऽस्मि यैस्तान् कथं
त्यक्त्वात्मम्भरिरभ्युपैमि भवता लोकान् प्रदिष्टानहम् ॥

धर्म्मः ॥ राजन्! स्वकर्म्म-वैचित्र्योच्चावच-स्वभावानां प्रजानां क्व पुनरेतावन्ति भागधेयानि ।

राजा ॥ क्षणं क्षणार्द्धं सह ताभिरेव
लोकान् प्रजाभिर्विहरामि * तांस्तान् ।
ममैव वा पुण्यलवेन † तासां
भवन्तु लोका भवता प्रदिष्टाः ॥

धर्म्मः ॥ सविस्मयम् ॥ अहो! लोकोत्तरं चरितमस्य राजर्षेः! राजन्! अनेन पुण्यदान-सम्भावितेनापरेण पुण्यसम्भारेण प्रजानामात्मनश्चोपार्जिताः शाश्वता लोकाः । तदुच्यतां किं ते भूयः प्रियमुपकरोमि ।

राजा ॥ भगवन्! अतःपरमपि प्रियमस्ति । तथाहि,
विद्या-लाभान् मुनिरपि मयि ‡ त्यक्तमि[illegible]
लब्ध्वा प्राणानयमपि शिशुश्चक्रवर्त्तित्वमाप्तः

* विचरामि इति पाठान्तरम् ।
† पुण्यबलेन इति पुस्तकान्तरस्य पाठः ।
‡ मुनिरयमपि इति अपरः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृष्टः साक्षात् त्वमपि भगवन् ! ब्रह्मसालोक्यमाप्तं
किं वा तत् स्याद्यदपरमतो यत् प्रियं प्रार्थयिष्ये ॥

तथापीदमस्तु ।

प्रमुदित-सुजना समृद्ध-शस्या
भवतु मही विजयी च भूमिपालः ।
कविभिरुपहिता निजप्रबन्धे
गुणकणिका ह्यनुगृह्यतां गुणज्ञैः ॥

अपि च ।

येनादिश्य प्रयोगं घनपुलकभृता नाटकस्यास्य हर्षाद्
वस्त्रालङ्कारहेम्नां प्रतिदिनमकृशा राशयः सम्प्रदत्ताः ।
तस्य क्षत्त्र-प्रसूतेर्भ्रमतु जगदिदं कार्त्तिकेयस्य कीर्त्तिः
पारे क्षीराख्यसिन्धोरपि कवियशसा सार्द्धमग्रेसरेण ॥

॥ इति निष्क्रान्ताः सर्व्वे ॥

इति आर्य्य-क्षेमीश्वर-कृते चण्डकौशिक-नाटके
[illegible]मोऽङ्कः समाप्तिमगमत् ।

सम्पूर्णम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

चण्डकौशिकम् ।

प्राकृतानुवादः ।

३ पृष्ठम् ।

पारिपार्श्विकः । आर्य्य ! किं पुनस्तेन राज्ञा समादिष्टम् ? ।

पारि । शृणोत्वार्य्यः, तदा ग्रहोपरागे यस्य द्विजवरस्यार्य्येण दक्षिणा प्रतिज्ञाता, स [illegible]नीं तन्निमित्तं परिकुपित इति सकल एव कुशीलवजनः पर्य्याकुलः ।

४ पृष्ठम् ।

[illegible]को । एतु एतु प्रियवयस्यः ।

५ पृष्ठम् ।

विदूषकः । भो वयस्य ! प्रजागर-तन्त्र्याभ्यां लोचनाभ्यां दरोद्गीर्णमुख इव कूर्म्म उन्मेष-निमेषान् कुर्व्वन्नपि मार्गमनवेक्षमाणोऽन्ध-मूषक इव इतस्ततः परिभ्रमसि ।

६ पृष्ठम् ।

[illegible] भो वयस्य । अहं पुनश्चिन्तयन् वासकसज्जाया देव्याः खण्डनाकृते तव [illegible] प्रेक्षे ।

[illegible]त पुनरेष परिहासः, मम पुनरनाथ-वटुकस्यानर्थ एव ।

विदू । परिकुपित इति तर्कयामि ।

७ पृष्ठम् ।

विदू । भो वयस्य ! किं त्वमतिक्रान्तमनुशोचन्नात्मानमायासयसि, तदेहि तत्रैव गत्वा देवीं प्रसादयावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८ पृष्ठम् ।

विदू । भो वयस्य! पश्य पश्य, एषा खलु देवी उपनीत-प्रसाधनोपकरणया चारुमत्या सह किमपि मन्त्रयमाणा उपविष्टा तिष्ठति ।

चारुमती । भट्टिनि ! एतत् प्रसाधनोपकरणम् ।

शैव्या । हञ्जे चारुमतिके ! अपनय एतत्; निष्फल-प्रसाधनोपकरणासक्त-हृदयया कियदिदानीम् आत्मा परिभावितव्यः ।

विदू । अहो ! अस्या गुरुकोऽभिनिवेशः ।

९ पृष्ठम् ।

विदू । भो वयस्य ! उपसर्पावः ।

शैव्या । हञ्जे चारुमति ! तथा समाश्वास्य आर्यपुत्रो मा विप्रलम्भ-गोचरीं करोतीति सर्व्वथा नमो नमोऽविश्वसनीयानाम् आत्मनो भागधेयानाम् ।

चारु । भट्टिनि ! अलं सन्तापितेन, बहुवल्लभाः खलु राजानः ।

विदू । आः दास्याः पुत्रि ! बहुकार्या इति भण, किं लोकोपालम्भ-गोचरं प्रियवयस्यं करोषि ?

१० पृष्ठम् ।

चारु । भट्टिनि ! समाश्वसिहि समाश्वसिहि, ननु ! अतिमात्र-महानुभावतया त्वयैवातिभूमिं नीतो महाराजः; तद् यदि मां पृच्छसि, तदा, प्रलोकयन्नपि न प्रलोकयितव्यः, प्रियमालपन्नपि चिरमुपालम्भैः खेदयितव्यः ।

शैव्या । किमिति ते वचनं न करिष्यामि, यदि दृष्टे आर्य्यपुत्रे एतस्य दुष्ट-हृदयस्य प्रभविष्यामि ।

विदू । स्वस्ति भवत्यै ।

शैव्या । कथमार्य्यपुत्रः ! भवतु एवं तावत् । ज[illegible]

११ पृष्ठम् ।

चारु । कथं महाराजः ! हा धिक् हा धिक्, श्रुतं महाराजेन यन्मया मन्त्रितम् । भवतु एवं तावत् । जयतु जयतु महाराजः । इदमासनम्, अत्रोपविशतु महाराजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैव्या । सुष्ठु शोभते आर्य्यपुत्रः एभिर्निद्रालसैरङ्गैः, उज्जागर-मन्थराभ्यां शोण-लोचनाभ्याञ्च ।

१२ पृष्ठम् ।

प्रतीहारी । जयतु जयतु महाराजः ; एष कुलपतिसकाशात् [illegible]सः प्राप्तः ।

प्रती । [illegible]राज आज्ञापयति ।

१३ पृष्ठम् ।

प्रती । [illegible]तु भवान् ।

शैव्या । पार्श्विकः [illegible] ! प्रणमामि ।

१४ पृष्ठम् ।

प्रती[illegible] यद् भव[illegible]ज्ञापयति ।

१५ पृष्ठम् ।

[illegible] यद् भवानाज्ञापयति ।

[illegible]मतिके ! भगवता कुलपतिना समादिष्ट आर्य्यपुत्रस्य निशाप्रजागरः, तद्दुर्जने [illegible]ताख्मि अनेन दुष्प्रत्ययेन दुष्ट-हृदयेन । भवतु एवं तावत् ॥ प्रसीदतु आर्य्यपु[illegible] ।

१६ पृष्ठम् ।

शैव्या । आर्य्यपुत्र ! [illegible] भगवता कुलपतिना यथाज्ञप्तं तथा अनुष्ठातुं [illegible]

[illegible]यस्य ! [illegible]देवी-सम्बद्धया कथया कथं नात्मानं विनोदयसि, क[illegible] त[illegible] [illegible]त्मानं विनोदयिष्यामि ।

—१७ पृष्ठम् ।

वनेचरः । [illegible] जयत जयतु भट्टारकः ; एष खलु, विकट-घोणाग्र-निर्दलित-मुस्तस्थली-[illegible]-सुरभि-निश्वास-मारुत-परिक्षिप्त-दन्त-यन्त्रान्तर[illegible]-वल्गमाण-मार[illegible]र-कशेरु-क[illegible]-प्रति[illegible]प्रतिपक्ष-जय-विघ्नित-निज-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यश-उत्कर-पूरित-दशदिग्विभागः, वर्षछिलासार इव नवजलधरः। गुरुगर्व-गम्भीर-घर्घर-शब्द-विद्रावित-वन-सिंह-निकर-रवाकर्णनामर्षोन्नमित-कर्ण-शुक्तिपुटमुद्वहन् विस्फुरदुरुक-रोषानल-शिखा-सन्दिह्यमान-तरलतर-जिह्वा-लता-विस्तारः निरन्तर-परिस्फुरद्वन-लग्न-दावानलोद्गार-भास्वरः विकट-तड़िच्छटा-कड़ार-केसर-सटा-कलापः निशित-करवाल-विमलेन्द्रनील-कज्जल-तमाल-श्यामलः परिस्फुरत्-पिङ्गाक्षिविक्षेपः वहल-मसी-मांस... स्फुलिङ्ग ... दावानलः दन्तान्तर-खण्डन-भय-कुण्डलायित-नि... ...द-दंष्ट्रा-करालमुखमण्डलः चिरकाल-संघटित-वैरानुबन्ध-गु... ...खण्डित-चन्द्रमण्डलोद्धरत्कलायुगल-शोभा-सनाथ इव ... अवतारित-धरावलय-लीला-समुत्थित इव महा... ...पुत्रो मा, ...प्रलम्ब-गोपतिर्मृगव्यभूमिम्। तदिदं श्रुत्वा भर्त्ता प्रमाणम्। ...हमपि तत्रैव...

१७ पृष्ठम्। ...ाः ...ानः।

विदू। भो वयस्य! अरण्य-चङ्क्रमण-कण्टक-शर-विकोपालम्भ-लङ्घन-बुभुक्षा-पिपासा-दोष-सङ्कुलं बहुप्रत्यवायं यदि मृगव्यं ... किं पुनस्ते आयासस्थानं भविष्यति।

२८ पृष्ठम्। ... अतिमात्र-महानुभावे-

... इच्छसि, तदा, प्रलोक-

नेपथ्ये। परित्रायन्तामार्याः! परित्राय... खेदयितव्यः। अनाथा अशरणा हृतवहे परिक्षिप्यामहे मन्... यदि इष्टे आर्य्यपुत्रे एतस्य मार्याः! तत् परित्रायन्ताम्।

४२ पृष्ठम्।

पापपुरुषः। सुखमात्र-मधुरमधुरः शोकवियोगाधि-

बहु-नरक-दुःख-दारुणी ...

हा मातृके! उत्पादितोऽस्मि व्यापादित... अनया द...-दग्धनगर्य्या। तिष्ठतु तावदिह प्रवेशः, प्रेक्षितुमपि न प... ...जन यन्मया किं नु खलु अत्र करिष्ये। भवतु इत एका... ...ासमम्, अतो-ऽर्जनैः जन्मान्तरसञ्चिते प... त... ...पि निष्क्रमतः पश्चादनुला...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

४३ पृष्ठम् ।

पुरुषः । आः असौ...यतत्, यदि एतस्या दग्धनगर्य्याः स राजा दुराचारो हरिश्चन्द्रो न भवति । क एष मन्त्रयते ? कथं भगवतो विषम-लोचनस्यासन्न-परिचारको भगवान् भृङ्गी इत एवागच्छति, तत् त्वरितमप-... ... ामि ।

५१ पृष्ठम् ।

...! मा खलु मा खलु आत्मम्भरी भव । तथा सुख-

प्रती । ... नीं कृत्वा साम्प्रतं का ते संविभाग-पराङ्मुखता । तत्

शैव्या पार्श्विकः ...ं आरोपय, अपश्चिमस्ते इदानीं च प्रणयः ।

... । क्रीणी... ...मार्य्याः क्रीणीत इतोऽर्द्धमूल्येन समवदासीम् ।

...ती ... । आ... ! मामपि क्रीणीत ।

५२ पृष्ठम् ।

... ...र्य्याः ! किं भणत ? कीदृशस्ते समय इति ? । परपुरुष-... ... ...परिहृत्य सर्व्वकर्मकारिणीति । ईदृशो मे समयः । निर्मीप्रजागरः, तद्दुर्जनेन समयेन क्रेष्यतीति ? । तद्गच्छत, प्रसीदत, किं ...तावत् ॥ प्रसीदतु आर्य्यपुत्र... द्विजवरो दीनजनानुकम्पी अन्यः कोऽपि साधुर्गां ...

शैव्या । आर्य्यपुत्र ! प्रायो विज्ञाप्यते ।

... । ... ...ज्ञापयति । एतु एतु उपाध्यायः एतु एतु ।

क्रो... तः ... ५३ पृष्ठम् ।

...दुः । ...उपाध्या... ...पि गुरुको जनसम्मर्दो दृश्यते तत्र मया भवि-

... ...नी । ... अन्तरम् अन्तरम् ।

वनेचरः । ... ...णीत मामार्य्याः ! क्रीणीत ।

दलित-मुसलस्थली-... ...नं परो... ...ष्ट-भोजनं परिहृत्य सर्व्वकर्म-... नर... ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाल । मामपि ।

शैव्या । अनुगृहीतास्मि । यदार्य्यः आज्ञापयति ।

५५ पृष्ठम् ।

शैव्या । नार्हति मां प्रथमोपगतामार्योऽतिक्रमितुम् । तदनुगृहाण माम् एषास्मि ते शरणागता ।

शैव्या । दिष्ट्या अर्द्धावशिष्ट-प्रतिज्ञाभार ... कृतार्थास्मि । ... दंष्ट्रा-क-

५६ पृष्ठम् ।

शैव्या । मुहूर्त्तं प्रतिपालयत्वार्य्यः, यावदार्य ... यपुत्रो मा ... लम्भ-गो-

शैव्या । अनुमन्यतां माम् एतस्य द्विजवर ... दासीत्वे ... न्युक्ता

५७ पृष्ठम् । ... मानः ।

शैव्या । यदार्य्यपुत्र आज्ञापयति । ... लोकोपालम्भ-

वटुः । आगच्छ भवति ! आगच्छ, दूरं गन्तव्यं ...

शैव्या । मुहूर्त्तं प्रतिपालय माम् । यावत् ... करोमि ।

! अतिमात्र-महानुभावे-

बाल । आवूक ! कुत्र अम्बा गच्छति । ... इच्छसि, तदा, प्रलोक-

बाल । अरे वटो ! कुत्र त्वमम्बां नेतुम् ... खेदयितव्यः ।

वटुः । अपेहि गर्भदास ! यदि दृष्टं आर्य्यपुत्रे एतस्य

५८ पृष्ठम् ।

शैव्या । आर्य्यपुत्र ! किं मां मन्दभागिनीं शो ... शिथिलयसि ।

६० पृष्ठम् ।

धर्मः । अरे सारमेय ! गृहीतस्त्वया अर्थमेटाकः ... जिन यन्मया ... मासमम्, अतो-

अनुचरः । महत्तर ... सुरा पातव्या । ... ता तथा ...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मः । अरे ! किं तव एतेन दृष्टेन प्रयोजनम् ।

६१ पृष्ठम् ।

धर्मः । अरे ! उत्तिष्ठ अहं तवार्थी, तद्गृहाणेदं यथाप्रार्थितं सुवर्णम् ।

धर्मः । वाढम्, अहमेवार्थी ।

धर्मः । सर्वश्मशानाधिपतिर्गुल्मस्थानाधिपानां प्रत्ययितः ।

...ननियुक्तश्चण्डाल-महत्तरः खल्वहम् ।

...६२ पृष्ठम् ।

प्रती । ... कीदृशस्ते समयः ?

शैव्या पार्श्विकः ... एष ते समयः । गृहाणेदं सुवर्णम् ।

६३ पृष्ठम् ।

प्रती ... अरे ! ...चिणश्मशानं गत्वा मृतचीरहारकेण भूत्वा अहोरात्रं

अहमपि स्वभवनमेव गच्छामि ।

... आर ...

६४ पृष्ठम् ।

... आर्या ! अपसरत, न भवत्येष वध्यः ।

निर्शाप्रजागरः, तद्दुर्जनैः ... आर्यपुत्रः ! किं भणत ? क एषः कुत्र वा नीयते ? एष

...तावत ॥ प्रसीदतु आर्यपुत्र... ...तरस्य सकाशात् बहुतर-सुवर्णं गृहीत्वा दासत्वं

...चिण-श्मशानं नीयते ।

शैव्या । आर्यपुत्र !

६६ पृष्ठम् ।

... । अरे ! ...तिदूरे दक्षिणश्मशानं, तत् त्वरितम् आगच्छ ।

क्रन्दन्तु त...

...६८ पृष्ठम् ।

... । ...

...नी । अरे ! ... इमां तुङ्ग-तरु-कुहर-वासिनीं भगवतीं

वनेचरः । ... एवं कुर्म्मः ।

दलित-मुसलस्थली-... ...मस्त... महिषासुरभिन्न-गात्रे ! ।

... कात्यायनि ! ... ...रच मां चण्डशूल-हस्ते ! ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२१२६

७० पृष्ठम् ।

चण्डालौ । कथम् ?

अस्तं गच्छति सूर्ये वध्यस्थानं गते यथा वध्ये ।

एष तमःसंघात-श्चण्डालकुलमिवावतरति ॥ ... तम् । तदनु...

७१ पृष्ठम् ।

एकः । अरे ! विविध-वेताल-सङ्कुलमेतद् ... कट-दंष्ट्रा-क- शीघ्रं गच्छावः ।

अन्यः । एवं कुर्वः ।

उभौ । अरे ! म... यपुत्रो मा ... लम्भ-गो- त्वया अप्रमत्तेन स्थातव्यम् । ... दासीत्वे अ... ...नः ।

७२ पृष्ठम् ।

चण्डालौ । हा मातृके ! समुत्थितो निष्प्र... कोपालम्भ- पलायावहे । ... तव्य ...

८१ पृष्ठम् ... ! अतिमात्र-महानुभाव- यत् साधक आज्ञापयति । ... पृच्छसि, तदा, प्रलोक- ... खेदयितव्यः ।

८५ पृष्ठम् ।

चण्डालः । अरे सुतस्य । ... यदि दृष्ट आर्य्यपुत्र एतस्य

चण्डालः । अरे ! एवं भणामि, यद् ... तिनी स्त्री करुणं करुणं रुदती तिष्ठति, तत ... कवियोगाधि- णास्याः शुद्ध-कम्बलः । अहमपि स्वामिनः ...

नेपथ्ये । हा जात ! क्वासि, दृष्ट ...

शैव्या । हा जात ! हा ... जिन यन्मया हा जात ! न युक्तमिदानीं पिता ... तस्त्वया अर्थपेटाकः ... मासमम्, अतो- भागिनीं परित्यजसि !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri. Funding: MIDF

तदनु...

...प इव

...रद-दंष्ट्रा-क-

...लम्भ-गो-

...मानः।

...कोपालम्भ-

...महानुभाव-

..., प्रलोक-

...।

...वे एतस्य

...यन्मया

... अवो-

...।। वाढ़

धर्मः

प्रती।

प्रौढ्या पार्श्विकः

प्रती ... अरे!

ग्रह...

...आर...

निर्मीप्रजागरः, तद्दुर्जनो

...तावत् ॥ प्रसीदतु आर्य्यपुत

प्रौढ्या। आर्य्यपुत्र!

...। अरे!

क्रौर्ष्ठ तव...

...। ...पाद

...नी। अरे! ...

वनेचरः। ... एवं कुर्माः।

दलित-मुस्तस्थली-... -मस्त...

नर... कात्यायनि! ग...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्त

मतम् ।

प इव

कूट-दंष्ट्रा-क-

एतत् ... र्य्यपुत्रो मा ... प्रलम्भ-गो-

म् । ... पुत दासीत्वे आ ... नियमन

७२ पृष्ठम् । ... जानः ।

मात्के ! समुत्थितो निश्च ... नीकोपालम्भ-

गता ... व्य ...

पृष्ठ ... यावद

ति । ... ! अतिमात्र-महानुभाव-

इच्छसि, तदा, प्रलोक-

: खेदयितव्यः ।

यदि दृष्टे आर्य्यपुत्रे एतस्य

वियोगाधि-

राजन यन्मया

गृहीतस्त्वया अर्थपेटकः ... मासमम्, अतो-

ता तथा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

... । वाढ़

धर्म

...पि इव

...द्र-दंष्ट्रा-क-

प्रती ।

शैव्या पार्श्विक

...पलम्भ-गो-

...नः ।

...तोपालम्भ-

प्रती

अरे !

ग्रह...

निद्राप्रजागरः, तद्दुर्जन

...ावत ॥ प्रसीदतु आर्य्यपुत

...हानुभावं-

..., प्रलोक-

शैव्या । आर्य्यपुत्र !

...वि एतस्य

। अरे ।

क्रन्दे तत्

...ः । ... रुपा...

...नौ । अरे !

वनेचरः । ... एवं कुर्म्मः ।

दलित-मुक्तस्थली-... -मस्त

यन्मया

... अवो-

... कात्यायनि ! ग...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

9

वाल्मीकिविद्यापीठपुस्त[illegible]कालयः

प्रत्यावर्ततिथिः

[illegible]मतम्

[illegible]प इव

[illegible]कुट-दंष्ट्रा-क-

[illegible]र्य्यपुत्रो मा [illegible] पालम्भ-गो-

[illegible]दासीत्वे अ[illegible]

[illegible]जानः ।

७२ पृष्ठम् ।

[illegible]तीकोपालम्भ-

[illegible]सात्के ! समुत्थितो निष्क्र[illegible]

[illegible] पृष्ठम् [illegible] ! अतिमात्र-महानुभाव-

[illegible]प्यति [illegible] इच्छसि, तदा, प्रलोक-

[illegible] : खेदयितव्यः ।

यदि दृष्टे आर्य्यपुत्रे एतस्य

[illegible]योगाधि-

[illegible]राजन यन्मया

[illegible]तस्त्वया अर्घपेटाकः [illegible]मासमम्, अतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

...प इव
कूट-दंष्ट्रा-क-

पलम्भ-गो-
...नियम...
...नः ।
कोपालम्भ-

...महानुभावे-
..., प्रलोक-
... : ।
...ते एतस्य

...न यन्मया
..., अतो-

... । वाढ...
धर्म...

प्रती ।
शैव्या पार्थिव...

...ती ... अरे !
अह...
...आर...

...निर्मीप्रजागरः, तद्दुर्जन...
...जावत् ॥ प्रसीदतु आर्यपुत्र...

शैव्या । आर्यपुत्र !

... । अरे ...
कष्टं तत...
... । ...रपाध...
...नी । अरे ! प्र...
वनेचरः । ... एवं कुर्मः ।
दलित-मुस्तस्थली-...-मस्त...
नर... व...त्यायनि ! ग...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu